ताः तैर्वीक्षितं प्रियस्य मद्दिशयि कानुकूलधर्मज्ञानेन फ्कचेव वक्रत्वं वीक्षणे उक्तं। पुनः कीदृशं। जातिस्वेद
तोद्दृ गंडस्थलं यस्य मद्वीक्षणे सात्विकभावो जातइति। पुनः कीदृशं। मांउद्दीश्यैव विशेषेण लक्षिता प्रद
र्शिता यास्मितसुधा तया मुग्धं आननं यस्य तासां वक्रवीक्षणे पिस्मितपूर्वकं मद्दमवलोकितत्वाशाजनकत्वं
तस्योक्तं। एवं दर्शनेन हर्षअलाभात्खेद इति निरूपितं। एवं प्रियस्यालाभेन्यपि व्यथयंतीत्याह। दुरालोक
इति। कासारोपवनसंबंध्यपि पवनो मां व्यथइति कासारसंबंधेन शैत्यसौरभाल्हादकधर्मा अपि संतीतथा
तथेत्यपि शब्दार्थः। कीदृशः पवनः। दुरालोकः दुःखरूप आलोको यस्याद्दर्शने सखइत्यर्थः। स्तोकः स्त
बकोयस्याः तादृशीनवकानवीनायाअशोकलतिकातस्याविकासोयेन तादृशः प्रथमं अशोकलतेवनवीन
स्तबकापिस्तोकप्रायः सापिदुरालोकः अंतर्गूढस्तस्यापि विकासकरणेन तत्सौरभग्रहणकौशलं मंदत्वंच
निरूपितं। एवंसति अशोकसंबंधेन शोकाभावसंपादनस्वभाव एवोचितः। ननु व्यथाकारण मितिभावा
व्यंजितः। किंच। चूतानां मुकुलप्रसूतिरपि भ्रामद्भृंगीरणितेन रमणीयापि अन्येषां मनोरमापि मां नसु
खयति प्रिया भावतापमेव जनयतितिभावः। कीदृशी शिखरिणी शिखराग्रभागस्तद्युक्ता मुकुलानाम
प्यग्रभाग एवंकुरितइतिभावः। अथवा। भावांतरेणापि दुःव्यंजयति। तथाहि। अन्यथाद्रो कासारोपव
नसंबंधी पवनउक्तः तत्र कासारशब्देन सरसीतद्रूपस्वयमेव तत्समीपवर्ती पवनः नायकएव निकटवा
र्येपि मत्करगतत्वाभावाद्व्यथयत्येव अन्यापि धर्मोस्ति व्यथाकरणेत दाह। दुरालोकेति। अशोकलताका

नाथिकातत्रापिनवीनातत्रापिस्तोकस्तबकाअंकुरितवक्षोजाअंकुरोपिदुरालोकः अंतर्गूढस्तादृशी
॥२६॥ विकासयतिपुष्यवंतीकरोतीतीमतसमीपिएवंकुर्वन्ममोत्कंठांवर्द्धयन्मांव्यथयत्येवेतीभावः।अपिपुनरि
यंचूतानांमुकुलप्रसुतिःकृतस्तत्सालित्वान्नायकएवतस्यांतःस्थितकामरसोद्बोधएवमुकुलप्रसूतिःमान
सुखयतिप्रत्ययभावात्।साकीदृशीभ्राम्यंतीभयादीतस्तनेोप्रभंतीभृंगीनायकाप्रभणकथनेनवोदेवद्दे
या।तस्यारणितंबलाद्गृहणेसातथाकरोत्येवतेनरभणीयापिमानसुखयतितदात्तिमिवर्द्धयतितिभावः
एवंवर्णनेनतदुत्कंठाजनितात्योमोहितेवल्लभ्णीस्थितातदारसस्थैर्यार्थंकाचानासखीकुंजांतरेअक
स्मादिदंपरोक्षजगौ।तदेवाह।साकूतस्मितमिति।राधायारूपमित्यध्याहार्यं।कीदृशंरूपंसाकूतंपूर्वोक्त
केलिविलोकनेनतदुत्कंठजनितविविधभावाकलितंस्मितंयस्यतत्तज्जन्यविकारेणआकुलाकुलंअ
त्यंतमाकुलंयथास्यात्तथागलद्धमिल्लंयस्यउल्लासितंपुनरेवलोकनार्थमुन्नतीकृतंभ्रूवल्लीकंयस्मिन्अ
लिकंमिथ्याव्याजसहितंयथाभवतितथादर्शितंभुजामूलार्द्धहस्तःस्तनोयस्यतादृशंरूपंगोपीनांनि
भृतंगुप्तंयथास्यात्तथानिरीक्ष्यगमितान्यसंबंधिनोआकांक्षायस्यतादृशोप्रत्वांतस्तदेवमुग्धंपरमसौंदर्
मनोहरंचिरंचिंतयन्वःक्लेशंहरतु।क्लेशोहरणेचहेतुःनवःकेशवइतिनवोन्ततनःयथायुष्माकंपूर्वंस्थितः ॥२६॥
तथानेदानीमितीभावः।इदानींतनस्वरूपमाह।केशवइति।ब्रह्मशिवयोमोक्षिदातेतिभवतोनामधिराज

सत्वेन मानादि भावमुत्पाद्य पुनः विरहेतामसत्वेन सर्वेंद्रियाणां लयं स्वरूपे संपाद्यांतः परमानंददात्वेत्यर्थः
अत एव वः पातु ए तादृश्या मवस्थायां तत् क्लेशहारको भवत्विति भावः एवं संति श्रीकृष्ण एतादृशीं राधारूपं
दृष्ट्वा त चिंतयाति व्याकुल इति प्रस्तावना कृता ॥ इति श्रीमत्पंचनदाचार्यवर्यश्रीमकविदामोदरभट्टसू
नु गोपालभट्ट विरचितायां श्रीगीतगोविंदटीकायां गूढार्थदीपिकायां अक्लेशकेशवो नाम द्वितीयः सर्गः ॥२॥
अत्र क्लेशनिवारकत्वेनाक्लेशवत्वमुक्तं। अथ श्रीकृष्णस्यावस्था निरूप्यंते। कंसारिरपिति। कंसस्तु महातामसः
स्वापराधिभक्तापराधी धर्मद्रोहिच दुरध्यासग्रस्तः तादृशस्यारिः अशेषदोषवासनां निवार्य मोक्षदाता
तादृशोपि अहंममाध्यासरूपः संसारः सावाह भगवदीया भगवान्ममैव नान्यस्य। इति कथमन्यत्र मोवि
हाय विहर। लीतिवासनारूपा बद्धाश्रृंखला यस्यास्तादृशी। अथवा सम्यक सारः श्रीकृष्णः स्ववासनाअ
होरात्रं स्वरूपनिष्ठभावैकव्यसनं तद्रूपा बद्धाश्रृंखला यस्यास्तादृशीं। (अथवा सम्यक सारः श्रीकृष्णः स्यवा)
हृदये आधायता दृश्या हृदय धारणे स्वयमपि तद्वासनाबद्धश्रृंखलो जात इति सूचितं। अन्येषां संसारवासनाना
शकस्य स्वयैतच्छृंखबद्धत्वं चित्रं तादृशः सन ब्रजसुंदरीः तत्याजात द्विहारादिकं सर्वं विस्मृत्य त्यक्तवानि
त्यर्थः। त्यागानंतरं पुनः किंकृतवांस्तत्राह। इतिस्ततइति। इतस्ततः कुंजांतरेषु तां राधिकामनुसृत्यानुसरणंकृ
त्वा अन्वेषयित्यर्थः अनंगबाणव्रणखिन्नमानसः सन् कृतानुतापः पश्चात्तापो येन तादृशः पूर्वोक्तिलतालकुंजे
विषसाद विषादं कृतवानित्यर्थः। यतः स माधवः स्वप्राणादप्यधिकां राधिकां विहायान्याभिः स विहारं कृ

तवानीति भावः। तमेव विषादं गीतेन वर्णयति। गूर्जरीरागे प्रतिमठतालेन। हरिहरि तिहरिहरीति खेदे। हतादरतया
॥२७॥ सा कुपितेव गता। यद्यपि मया तस्याः। अनादर एव कृतस्तथापि सा कुपितेव गता न तु सर्वथा त्यक्तेति स्नेहः सू-
चितः। ध्रुवपदं। तमेवानादरमाह। इयं मां वधूनिचयेन वृतं विलोक्य चलिता तर्हि कथं न गृहीतेत्यत्राह। सापराधेति।
अहं सापराधोऽस्मीति भयेन मयापि न वारितेति तौ महान् खेदः सूचितः। एवं सत्यतः परमानुनयेतित्याह। किं क-
रिष्यतीति। सा चिरं विरहेण कृत्वा किं करिष्यति प्राणानामन्यथाभावमेव संपादयिष्यति अथवा किं वा वदिष्य-
ति विप्रलापमित्यर्थः। अथवा अनुनयकारणेऽपि मद्वचनं करिष्यति किं पुनः वदिष्यति किमपि शृणुनेत्यर्थः। यद्वा।
सखीजनः किं वा करिष्यति दंडादिकमित्यर्थः किं वा वदिष्यति जनेन सा तु मां विलोकयिष्यत्यपि नेति सूचितं।
यदि किंचिदपि न कुर्यान्न वदेद्वा तदा किं जनेन समस्तवधूजनेनेत्यर्थः। मज्जन्मना वा प्राकट्येनेत्यर्थः यद-
र्थं प्राकट्यं सा तु गतेति तस्य विफलत्वमेवेति किं तेन किंच। लोके सर्वेषां धनमेव सर्वस्वं तस्मिन् गते प्रा-
णा एव प्रयांति मम सर्वस्वं रहस्यं धनं सैवेति तदपगमे किं मम धनेन साधारणेनेति तथोक्तं। धनाभावे जीव-
नमेव व्यर्थमिति तदभावे किं जीवनेन। एतेन मम जीवनरूपा सैवेत्युक्तं। एवं सति रसरूपत्वात् सर्वं सुखमि- ॥२७॥
ति भावः। किंच। यथा जीवनाभावे गृहं व्यर्थं तथा तदभावे गृहेण लीलागृहेण किं। अथवा जीवनस्य गृहं देह एव
तदभावे यथा देहस्य व्यर्थत्वं तथा मम जीवनरूपा सा तदभावे रसात्मकत्वे गच्छतीति भावः। अत एव सुखेना

पि किमित्युक्तमग्रे सुखे पाठांतरे। अतः परं सा रुष्टापि जीवनरूपेति नेमे विस्मृता भवतीत्याह। चिंतयामिति।
रोषभरेण कुटिलाभ्रूर्यस्येति तादृशं तदाननं चिंतयामि कीदृशं तदित्यत्याह। शोणेति। रूषेण अरुणं तत
दुपरि मधुपानार्थं भ्रमतां भ्रमरेणाकुलं शोणपद्ममिव मधुपानाशया यथा ते भ्रमंति तथा तच्चिंतनेन तद
नुयाममापि जीवनं तथेति भावः। एवं चिंतनेन तादात्म्ये तत् संगममेव मन्यमानो वदति। तामहमिति। अहं
त्वद्दिसगतानां ऊननिशाम्य शंसर्वेंद्रियाश्चाय त्वेन रमयामिति तादृशीत्यत्कावने। तां अनु अत्रस्थितां अत्रत्राथि
ते ति चिन्हानि लक्षीकृत्य कीसराभिगच्छामीत्यर्थः। किंवा लपामि सीतु संगते वास्ति बहि विरूपनं वृथैवेति भा
वः। अथवा। तां हृदि संगतां रमयामि परंतु अनुलक्षीकृत्य किं सरामि किं लपामि अपितु नेत्यर्थः। एतेन बहिस्तथा
त्वाभावे सर्वं व्यर्थमित्यर्थः। पुनस्तामतः प्रकटीभूतां प्रतिवदति। तत्त्वीति। तव हृदयं मां विहायान्यत्र रमत इत्यस्य
याखिन्नं आकलयामि जाने परंतु तह दनेव प्रियत्वं दंडमकृत्वा कुतो गतासि स्थितासि तदपराधस्य दंडकरणमेवोचि
तं तनुत्याग इति भावः। अतः परं यदि प्रत्यक्षा भवसि तदा तेन प्रणिपातेन ते त्वां अनुनयामि। अथवा ते तव मेलन
त्वत्संबंधि प्रणिपातेनेत्यर्थः। एतेन मम अपराधः क्षंतव्यः दंडोपि कर्व्य इति सूचितं। अत्र व्यभिचारिभावत्वेन प्र
तिक्षणं नवा एव प्रादुर्भवंत इति कदाचिद्दर्शनं कदाचित्तदभाव इति ज्ञायं। तदेवाह। दृश्यस इति। हे तत्विपु
रतः अग्रतः त्वं दृश्यसे परंतु गतागतमेव मम अग्रतो विदधासि मम आर्तिं वर्द्धयंती यातायातमेव करोषि। ननु
तर्हि किं कर्त्तव्यं तत्राह। किमिति। पुरेव सखं भ्रमं सादरं परिरंभणं न ददासि तत्किमिति न जाने। यदि वदसि त

॥२८॥ तवापराधोस्ति किंचित्तदा क्षमा क्रियतामित्याह। क्षम्यतामिति। एको अपराधस्तु क्षंतव्यो भवति क्षम्यतां
पुनरयं कदापि इदृशं न करोमि हे सुंदरि तव दर्शनं मम देहि। मम इति षष्ठ्या दर्शनस्य पुनः प्रत्यदानं सूच्यते।
अन्यथा चतुर्थी विस्यात्। तेन एकवारं देहि पुनः यथा भनस्तथैव कर्तव्यमिति भावः तत्र हेतुः मन्मथेन दु
नोमिति। एवं सति सरूपत्वदर्शनेनैव विरहाग्निः शामयिष्यति नान्यथेति सूचितं। एवं गीतेन तदवस्था भग
एव जातइति गीतमुपसंहरति। वणितिमिति। हरेः संबंधि इदं गीतं जयदेवकेन वर्णितं तत्र हेतुः प्रणतेन। नतो
प्रकर्षस्तद्भावापन्नत्वमेव पुनः कीदृशेन किंदुबिल्वेति। किंदुबिल्वेति मत्कुकप्रासो ग्राम इति सर्वैर्व्याख्या
तं। स एव समुद्रस्तत्र संभवो यस्य तादृशश्चासौ रोहिणीरमणश्चंद्रः तादृशेन यथा चंद्रस्य समुद्रादुत्पत्तिमात्रं
दूराद्दूर्द्धिकत्वं च संबंधो नान्यः कश्चन। साक्षान्सजातीयसंबंधस्तु नक्षत्रैः सुजातः तत्रापि रमणो रोहिण्या ए ह
व प्रसिद्धः तथास्यापि किंदुबिल्वे नोत्पत्तिमात्रं दूरादेव पोषकत्वं च संबंधः। साक्षान्संबंधस्तु भगवच्चर
णारविंदरसजातद्रतः संबंधिभिश्च सजातीयत्वमिति हरेर्जयदेवकेन प्रणतेन रोहिणीरमणेनेति विशे ॥२८॥
षणत्रयेण सूचितं भवति अन्यथा वर्णनमेव नाभविष्यत्। किंच। रोहिणी प्रजापति नक्षत्रमिति र
जः प्रधानत्वाद्राबोत्यादिका तया रमत इत्यंत तादृशभाव प्राकट्येन रमत इति तादृशभावेनैवेतद्वर्णितमि
तिभावः। कुचित् प्रवणेनेति पाठः। तदा प्रवणेन तत्परेणेत्यर्थः। यद्वा। प्रवणेन तत्परेण तत्परत्वं नाम ताः स्थि

तत्प्रभुस्वरूपलीलानुभवजनितपरमप्रेम्णा तत्तदाविर्भावेन तद्भावैकनिष्ठ्यासेवापरत्वं। एवं सति इदानीमपि
याविरहजनिता यादृशी प्रभुलीला स्वस्वांतेनुभूता दृष्टा तत्क्लेशजनितार्तिः। स्वस्यापि सहतो जातेति तदुज्ज्व
लव्यसनवतीनां सखीनां मध्य एतद्वर्णितं हरेरेव संबंधितत्सुरनुवर्णितमित्यर्थः। अथवा हरे रथैवर्णितं य
तोंतःस्थितस्य प्रभोः स्वगुणश्रवणेन स्वपरमानंदैकस्वभावाद्दुःखशांतिरेव भविष्यतीति। एवं तत्सर्वं
रूपः सेवकधर्मो सिद्ध इति भावः। अतएव वचनानाममृतमयत्व ज्ञापनाय चंद्ररूपत्वेन स्वविशेषणं द
त्तं किंच। साक्षाच्चंद्रस्तु इदानीं तापकर इति स्वस्य तद्भिन्नत्वज्ञापनाय किंदु बिल्वसमुद्रादुत्पत्तिनिरू
पिता। उभयदलात्मकरसजनितसुखदुःखाभिज्ञत्वज्ञापनाय रोहिणीरमणेन युक्तं। अन्यथान्यदेव
नामोक्तं स्यादिति सर्वमवदातं। अतपरं जाग्रदवस्थायां प्रलापो निरूप्यते। हृदितिं। हे अनंग एके हस्त
रहिताः केचन पादरहिताः केचन नेत्ररहितास्त्वं त्वंगरहितस्तथापि मयि क्रुधा धावसि तच्चित्रं। अथवास्व
यं अंगरहितः अन्येषामप्यंगाभावसंपादकः मयि तथा धावसि तत्किमु किमर्थं प्रयोजनं विना वृथैवेति भा
वः ननु त्वं मम शत्रुः हरासि इति प्रहारार्थं युक्तं धावनं तत्राह। हरभ्रांत्या मां मा प्रहर प्रहारं मा कुरु अहं क
रो नास्मि किंतु तव भ्रांतिरेवेयं। तामेव दूरीकरोति। हृदय विससता हारः भुजंग मनायको वासुकिर्न कं
ठे च कुवलयदलानां श्रेणी नीलकमलदलमालानां पंक्तिरियं धृता तापहरणार्थं सा गरलद्युतिर्नास्ति। अन्य

च्च। इति भपि मलयस्य रजः नेदं भस्मेति भ्रमरूपैर्लक्षणैर्हरस्य भ्रांतिरेव न तु हरोहं। अतः प्रियारहितमयि
॥२९॥ माप्रहारं कुर्विति भावः। किंच। स तु अर्द्धांगे प्रियासहितः अहं तद्रहित इति भ्रांतिरपि न संभवतीत्यर्थः। ए
वं प्रहारभयेन पुनर्दैन्येन प्रार्थयति। पाणाविति हे मनसिज अमुं चूतांकुररूपसायकं पाणौ मा कुरु तमेव
चूतं कंपनेन विततं विलोक्य वदति अमुं पुनश्चापरूपं मा आरोपय सज्जं मा कुरु हे क्रीडानिर्जितवि
श्व तादृशस्य तव मूर्छितजनाघातेन किं पौरुषं न कोऽपीत्यर्थः। ननु मूर्छितत्वं कुतस्तेत्राह। चिंतया
भिलदाननमित्यादिना यस्याश्चिंतनमुक्तं तस्या एव राधायाः प्रेंखंतः कुसुमरूपा ये आसुगा बाणास्तेषां श्रे टा
ण्यः ताभिर्जर्जरितं जीर्णीकृतमंतः शकलीकृतमित्यर्थः तादृशं मनः मनागपि अद्यापि न संधुक्षते जाग्रद
वस्थापन्नं न भवतीति तादृश्य पुनरावर्तितव पौरुषं न कीचिदपि भावः। एवं मूर्छायामपि पुनः पुनः प्रबो
धो भवतीति कामो मां जेतुं न शक्नोतीति तदर्थं दैवतारा घनं करोतीत्याह। भ्रूपल्लवमिति। स्मरेण कामेन निर्जि
तजगंत्यपि अस्त्राणि अयं जेतुमशक्यस्तत्सहायेन जेतव्य इति तस्यां किमर्पितानि अपि त्वर्पितान्येव य
या अशक्यमपि दैवतावेशेन शक्यं भवेदिति। तानि कानीत्याकांक्षायामाह। भ्रूपल्लवं धनुः अपांगतरंगि ॥२९॥
तानि बाणाः श्रवणपालिः श्रवणयोः सीमा यस्य सः श्रुत इत्यर्थः। तादृशो गुणो गुणः अथवा श्रवणपा
लिरेव गुणः अपांगबाणानामाकर्णांतत्वे श्रवणपालेरेव गुणत्वमिति भावः। ननु तस्या असाधारणो ध

र्मः किंलक्षणोस्ति येनाशक्यमपि साधयति तदाह विशेषणेन। अनंगेति। अनंगानि सेनांगानि उद्दीपकवि
भावरूपाणि तदभावेनैव जयोस्या यस्या वाययाबा तादृशीं जंगमरूपां देवतां अन्यादेव स्थिरा भवतीति त ता
त्प्रसादरूलः दुर्जयो भवति इयं जंगमरूपेति सुखाराधा तादृश्यां तस्याम् अपि तानीति सावदंगीकरोति। तद
जयः सिद्ध एवेति भावः यतः साधनाभावेन क्षभंगादिनैव जेतुं समर्थेति। अतः परमनंगसहायत्वेन प्रह
रंतीं जंगमदेवतामेवोपालंभते। क्षचापइति। हतत्वितवकराक्ष विशिखः क्षचापे निहितश्च मन्मथांतनो
त्येव आदौ स्वयमेव भ्रमणकारकः पश्चात्पुनश्चायं यो जिनस्तत्रापि विशिखः विशिष्टशिखा ज्वाला यस्य
प्रियास्वरूप इत्यर्थः। अथवा विगतशिखः निर्भय इति यावत्। तादृशोऽव्यथां तनोति तत्तनोतु उचितमेव
तादृशस्य त्वंगीकारः। किंच। अयं कवरीभारोपि मारोद्यमं मारणोद्यमं मारस्य वा तद्रूपमुद्यमं करोतु तदप्यं
गीकृतं यतः श्यामात्माकालसर्परूपः अत एव कुटिलश्च एतेन तस्यापि तथैव स्वभाव इति निरूपितं। अ
न्यच्च। अयं बिंबाधरश्च तावन्मोहं तनुतां तत्र हेतुः सोपि रागवानिति।। स्वरूपतोप्यधरः साधनतो रागवा
न् स्वार्थपर इति तित्तथोक्तं स्वरूपसाधनयोर्हेतुत्वं सर्वत्र ज्ञेयं। अयं तु सद्वृत्तः वर्तुलत्वेनोच्चत्वेन महत्वे
न च स्वरूपउत्कर्षः सच्चरित्रत्वेन साधनतोप्युत्कर्षस्तादृशस्तवस्तनमंडलः ममप्राणैः कथं क्रीडति एतस्य
मत्प्राणबाधाकरणं नोचितमिति भावः क्रीडतीति पदेन तस्य क्रीडा भवति ममप्राणाश्च गच्छंतीति सूचि

तं। एवंमूर्छितावस्था निरूपिता अतःपरंमदशमावावस्था भविष्यतीति काचनसखीकुंजांतरेप्रियमा
॥३०॥ श्वासयंती गानंकृतवतीत्याह। तानीति। अत्रहे अतिविचाररहितप्रियेतिसंबोधनमध्याहार्यं। इदानींचे
त्तव मानसेतस्यांराधायांलग्नसमाधिर्वर्त्तते। तदा सर्वेंद्रियाणां विषयलाभेनस्वस्वविषयेय बिरहव्याधिःक
थंवर्द्धते कारणाभावात्। यर्हि विचारएव विरहसंभावना अंतर्विचारेपि कथं विरहाभावस्तत्राह। तानिति।
तानिस्पर्शसुखानित्यादयः पंचाविषयाउक्ताः तेतु पंचभिरपितैरंतःसाक्षादनुभूयंत इतिकथं विरहस्तवे
ति विवेकाभावेनैवसनान्यथेत्यर्थः। एवंसतिसासंमीपएवागता प्रत्यक्षमेववर्त्तते विवेकाभावेनभवा
न्नवेत्तीति विरहव्याधिरंतरनुसंधानेकथंवर्द्धते अपितुनवर्द्धत इत्यर्थोपि व्यंजितो भवति। इदानींरा
धाया अप्येतादृश्येवावस्था वर्द्धत इति तामप्याश्वासयंती काचनसखी निकुंजांतरेणपठतिस्वसखी
नांमोदंवर्द्धयतीत्याह। तिर्यक्कंठेति। मधुसूदनस्य कटाक्षो मेयः वः सखीभ्यः त्वेमंददतु। कथंभूताः
सम्यक मुग्धसुंदरे मधुरेच अथवसुधासारेराधामुखेंदौकंदलिताः प्रेम्णाप्रसृताः रसासारपूर्णेराधामुखे
दुरूपीलवाले प्रेमरससेकेनकंदलत्वं प्राप्ता इतिभावः। अतएवं वशेषउच्चरंती याभीतीतस्या स्याना
नि स्वरग्राम मूर्छनादिरूपानि तेषुकृतमवधानं याभिस्ताः दृश्योयाललनाः तासांलक्षैर्नसंलक्षिताः ॥३०॥
तासांगीतरसासक्तोतदज्ञातत्वेन प्रसृतीकृताइत्यर्थः एतेनराधायां निरूढं प्रेमसूचितं। कथंभूतस्य

तिर्यक्कंठं यथास्यात्तथा विलोलो मौलिस्तेन तरलं कुत्तं सोयस्य गीतालापनृत्यं च तथा भवतीति तथोक्तः ॥
अत्र मधुसूदनपदेन मधुर्दैत्यः सोत्रराहुस्तं सूदयतीति ब्युत्पत्त्या राधामुखेंदुप्रकाशकत्वं सूचितं ॥ ॥इति
श्री गीतगोविंदटीकायां गूढार्थदीपिकायां मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥ ॥ अस्मिन्सर्गे श्री
कृष्णस्य विरहावस्थया मुग्धत्वं राधामुखेंदुप्रकाशत्वं च निरूपितमिति मुग्धमधुसूदनत्वमुक्तं पूर्वसर्गे वि
रहेणैकांते प्रियाचिंतनेन यामिनयं तज्ज्ञात्वा राधासहचरी स्वप्राणप्रियावस्थां ज्ञापयितुं तत्समीपमागत्य
तदवस्थामुक्तवतीति निरूपयति । यमुनेति यमुनातीरसंबंधि विचारमूढमिव स्थितं । पुनः कीदृशं म
मर्षेणाक्रांतं घूर्णायमानं माधवं लक्ष्मीपतिरपि राधाप्रेम्णा तथाभूत इति सूचितं । अथवा बहुरमणीरम
णोपि तथैति तादृशं राधिकासखी गीतेन प्राह । कर्णाटरागेणैकताले गीयते । सा विरहेतव दीनेति । हे माध
व सा राधा तव विरहजा तद्इत्यर्थः दीना दुःखिता परमं दैन्यमापन्ना वात्वदन्यः कोपि रक्षको नास्तीति । ननु कु
तो भयं तस्या इति चेत्तत्राह । माधवेति माधवेति संबोधनमुभयत्र विरहदुःखे हेतुः तेन सा सकलेंद्रिय
षु भावनया त्वय्येव लीनात्वं प्राप्ता गुसावा । तत्र हेतुः मनसिजविशिखभयादिव तत्प्रहारसहनासम
र्थत्वद्दयात्तथेतिभावः । किंच । सेतिपदेन या आबाल्यत स्त्वां विनाक्षणमपि स्थातुं न शक्तेति ज्ञापितं
अथवा । तव सा तव विरहे दीनेति महदनौचित्यं । अथवा तव विरहे सा दीनेति तस्या उचितमेव यतः
सा तत्वदीया तादृश्या त्वां विना कथं शक्यत इति त्वत्तु नोचितं यतस्त्वं धिसति त्वदीया दुःखिता भ

वंतीति। ननु एतावद्दैन्यं कुतः क्रियत इति चेत्तत्राह। मनसिजेति। इवेत्येवार्थे। तत्प्रहारसहनासमर्थैव
॥३१॥ वदैन्यं भजत इति भावः। अत एव भावनया त्वय्येव लीना। प्रत्यक्षत्वेन तव चरणशरणे चरणसंबंधा
द्रक्षायां लयासंभवः। इत भावे भावनया अंतरेव संबंधे सर्वेंद्रियाणां तत्रैव लयो जात इति तथोक्तं।
मनसिजविशिखभये हेतुः। माधवेति संबोधनं पूर्वमुक्तमेव। त्वमन्यस्याः प्रियो जात इति। अथवा मनसि
जात भयादिवेत्यत्र इव शब्दार्थ एवेनैव योजना। एवं सति यद्यपि सा निरूपधि प्रेम्णो वैकेवलं त्वयि लीना तथापि
त्वं माधवो सीति सखीनामस्माकं परं मनसिज भयमानमिति व्यंजितं। किंच। येनापहारकाः पदार्थाः त एव
त्वां विना तापकारका जाता इति परमदैन्यं निरूपयति। निंदतीति। लोके आह्लादकत्वेन चंदनं प्रथितं परंतु
घर्मस्तापकरो नुभूयत इति रक्तत्वयोग्य मिति निंदति। इंदुकिरणमनुलक्षीकृत्य अधीरं धैर्यरहितं यथा स्या
त्तथा खेदं व्यथां प्राप्नोति संतापकारित्वात्तापासहिष्णुः खेदं यथा प्राप्नोतीत्यर्थः। किंच। इंदुरितिरसा
त्मक परमैश्वर्ययुक्तो निरूपितः। तेन सर्वानंददानेति लोके प्रसिद्धः। सोत्र विपरीतो जात इति खेदं करोति
कथं मां प्रत्येवैताहशो जात इति। किंच। मलयसमीरमपि गरलमिव कलयति जानाति। तत्र हेतुः व्या
लेति। व्यालरूपो निलयस्तेन मिलनं नित्यं भक्ष्यत्वात्तन्मुखसंगस्तेन फूत्कारेण विषरूपमेवोद्दीर्णं भव ॥३१॥
तीति तथात्वमुक्तं। किंच। पूर्वं स्वयं मदनशरभयात्त्वयि लीनेति निरूपितमिदानीं मंतः स्थितस्य तव

तद्धृदयं यथा न भवेत्तथा करोतीति वदति। अविरलेति। विरहसंतापशांत्यर्थं स्वहृदयरूपे मर्मणि तत्र
चेदग्निः प्रज्वलितः भस्मैव करोतीति सजलनलिनीदलानां तल्पं करोति दधातीत्यर्थः। सजलपदेन त
त्कालावचयः सूचितः यद्यपि तल्पकरणं विरहानलोपचारत्वेनास्माभिर्विधीयते तथाप्यन्यथैव क्रियते।
तदाह। अविरलं यथा भवति तथा स्वस्मिन्निपतितो यो मदनशरः अमोघत्वज्ञापनाय शरएकवचनं।
तस्माद्यद्द्रवद्वनं तदाघातात्क्षणं तदर्थं वर्म मे वक्कवचमिव करोति। एवं त्वेवार्थकोवा। तदपि विशा
लं घनीभूतं विस्तीर्णं वा। एतेन स्वपीडातोपि मत्संबंधिनी साधिका भवतीति सूचितं। अतः परं कुसु
मशरशराघातघूर्णायमानां तिमावस्थां निश्चयं जानती परलोकसुखमेवातः परं साधनीयमिति तदु
पयोगिव्रतं करोतीत्याह। कुसुमविशिखेति। जन्मांतरेपि तव परिरंभसुखमेव भवत्विति तदर्थं कुसुम
विशिखस्य शरतल्परूपं व्रतं करोति। यथा यो युद्धे आयुधप्रहारेण पतति स जीवत्परलोकसिद्ध्यर्थं शरश
य्यारूपं व्रतं स्वीकरोति तथेयमपि कुसुमविशिखप्रहारेण पतिता कुसुमशय्यायां शयिता तद्व्रतमेव
करोतीति भावः। कीदृशं तल्पं। संतापनिवृत्त्यर्थं कुसुमानामेव शयनीयं तूलास्तरणोपधानादिकं यस्मि
न् तादृशं। शरशय्यामतस्यापि सर्वं शरमयमेव भवति। कीदृशं तल्पं व्रतं च। अनल्पाः विलासकलाः
त्वत्संबंधिन्यः कमनीयाः वांछनीया यत्र तादृशं। एवं व्रतेन परलोकेपि ताः कला अनुभूता भवंत्विति भावः

इदानींतल्पे विलासकलानामसंभवत्वज्ञापनायतल्पविशेषणंतद्धेतुकंव्रतविशेषणंचोक्तं। एवंतस्या
॥३२॥ अवस्थाज्ञापिता। अतःपरमेतादृशाग्निनिर्वापणसाधनमपिसन्धत्तद्धातिपरंतुसननिर्वापतीत्याह। वह
तीति। साचपुनराननकमलंवलितविलोचनजलधरंवलितंअतःपरावृतंमुद्रितमित्यर्थः तादृगवस्थायां
लोचनयोर्निमीलनभवत्येवेतितादृशंयद्विलोचनंतस्मिन्जलंधरतीति तादृशंवहतीतत्रापिउदारंजलद
नइत्यर्थः। अश्रुजलवहनेनाननस्याछ्छानत्वसूचितं। तत्रापिजलधरपदादश्रूणांबाहुल्यंनिरूपिता। वृष्टि
समयेकमलानामपिछ्छाताभवतीति आननस्यकमलत्वमुक्तं। एवंरुध्यापिसाग्निर्नशाम्यतीतितस्यम
हत्वातुर्यंद्योतितं। अत्रदृष्टांतः कथंभूतमिवाननकमलं। विधुमिवेति। विकर्येयो विधुंतुदंतोराहुदंतस्त
दलनंतेन गलिताअमृधारायस्मात् तादृशंयथाराहुदंतदलनेनचंद्रादमृतधारापतेत्तथामुखचंद्राद
श्रुधारापतीतिभावः। एतेनराहुदलनेचंद्रस्ययथाकांत्यभावस्तथानतस्यापीति द्योतितं। अतएवतादृशं
चंद्रदृष्टांतोदत्तः। लोचनयोरंतःपरावृत्यासर्वत्रांधकारयेवबाहिर्भासइति संरोधवश्यामत्वेनराहुरत्रज्ञेयः
अथवा। विरहएवराहुः एवंसति मूर्छावस्थानिरूपिता। अस्यामेवजाग्रदवस्थाचेत्तदोन्मादावस्था ॥३२॥
भवतीति तादृश्यांकदाचित्तवालेख्यंकरोतीत्याह। विलिखतीति। त्वद्ध्यानावस्थायांविघ्नकर्त्रीत्वां
विना। स्यात्तुमनशात्स्या प्रियोमिलतिचेदेवमेवंकरोतीति विविधमनोरथनभवंतंविलिखतितदपिसमा

नवर्णत्वात्कुंरंगमदेन। कीदृग्रूपं लिखामीति बिचारे जितकोटिकंदर्पत्वात्तस्यानंगत्वाच्च साक्षादसम
शरफलं भवंतमेव लिखति। सतु मत्प्रतिपक्षास्तापकर्त्ता अयं तस्य ते तामत्तापहर्त्ते ति तथा करोती
ति भावः किंच। शत्रुजये यत्पदार्था दत्वा आनियंते। तत्ररूपादिकं स्वस्वरूपैकदेशीलमितमेव कृतं धनुर्बाण
दिकमपि स्वस्थाने स्थापनीय मिति नवनूतं करे विधाय धनुर्बाणयोरेकरूपत्वादेकमेवोक्तं। अथवालुंट
नेयदेव समीचीनं दृष्टं तदेव गृहीत मिति तदेव करे कृत्वा लिखतीति संबंधः। अतएव नवपदं तुत्तमत्वज्ञाप
नाय। अतः परमवशिष्टः केतुः सच मकरस्तं अधो विधाय जयानंतरं शत्रोः केतुश्छेत्तुउच्चं एव स्थाप्यते
तदातस्य पुनः पूर्ववदेदेवोद्भवो भवतीति यथास्य पुनरुद्भवो न भवेत्तथाधः ऽकृत्वात्वां प्रणमति। साधु
कृतं दुष्टो मारित इति। अतः परं पुनरुद्भवो माभूदिति प्रकृष्टेन नमति। यद्यपि दुष्टो मारितस्तथापि म
यि तव प्रसादो नास्तीति सुखदायितो पि दुःखदा भवंती त्याह। प्रतिपदमिति। माधवः त्वंतु बहुस्त्रीकइ
ति न काचिच्चिंता। अहं तु तवचरणे पतिता त्वामेवाश्रिते ति दासीत्वेनापि कृपयेति भावः। प्रतिपदं पदे
पदं प्रतिप्रति वाक्यं वा। एवं निगदति। एतावदैन्ये हेतुं निरूपयति। त्वयीति। त्वयि विमुखे सति मयि सु
धानिधिरपि तनुदाहं तनुते सतु अमृतनिधिः मृतमपि जीवयति। तापं हरति। आनंदं ददाति चेति म
य्येतत्त्रयमविपरीतं करोतीति तथा दैन्येन प्रार्थ्यते। किंच। सुधानिधिः कामस्य मित्रं समशत्रुरिति

तत्पक्षपातेन मां दहति तदपि न वैवै मुखे सा मुखो मुखेनैव सोपि तिनो भवेदिति दाहकरणे पि न सम
र्थो भवेदिति भावः। पूर्वश्लोके चित्र रचनया कालनिर्वाह उक्तः इदानीं ध्यानेन तत्प्रकारमाह। ध्यानलयेन
॥३३॥ ति। ध्याने यो लयः सर्वेंद्रियाणां स्वरूप चिंतनैक निष्ठता। योगे हि प्रथम ध्यानेन प्रत्येकं अंगं पृथक् पृथक्
चिंत्यते। पुनर्ध्याणां समुदितं तथा। तदा संपूर्ण स्वरूप कल्पनं भवति तत्र सर्वेंद्रियाणां लयस्तदेक निष्ठत्वं।
तेन पुरः भवंतं परिकल्प्य अन्यथा साक्षाद्दुरापमेवेति। भावनया मग्रे स्थितं भवंतं मत्वा विलपति। पूर्वर
चित संगाभाव दुःख मुपालंभवत्तेन वदति। पुनः परिरंभादिना सुखासौ हसति। पश्चाद्वियोग शोकवशा
विषीदति विषादं प्राप्नोति ततस्तव जिगमिषायां रोदिति गमनेचं चचति रोद्धुमनुगच्छति। अंतः पूर्णश्वास
त्समे मिषेण बहिस्तापं मुंचति। निराशायां अंतस्थं बहिः प्रकटीकरोतीत्यर्थः। अथवा। कदाचिज्जिगमि
षायां रोदनं करोति। तिरोदीमीत्युक्तं। तदा परमार्तिं दृष्ट्वा भवानाश्लेष मिव करोतीत्यारोपे चंचति प्रगल्भ
तेसोदं प्राप्नोतीत्यर्थः। पुनस्तापमपि मुंचति। साक्षात्संगमिव मन्यमाना तदानंदमग्नासापं मुंचतिस्य ॥३३॥
लतीति भावः। अतः परं सैवावस्था सर्वदा तस्याः तिष्टतीति गीतमुपसंहरति। श्रीजयदेवेति। इदं श्री
जयदेवेन भणितं साक्षात् श्रीयुक्त भावात्मकांतः प्रकटरूप प्रभुणेव भणितमिदं गीतं अधिकं यथास्या
त्तथा पठनीयं। तत्र हेतुः। यदीति। यदि मनसा नटनीयं विविध भावैर्नर्त्यं करणीयं तदेत्यर्थः। इदंभा

वभावनायामिदमेव पठनीयं नो चेदन्यदिति भावः। कीदृशं भणितं। हरिविरहेणाकुलाया वल्लवयुवती
राधा तत्सख्याः वचनानि यत्र तद्वचनरूपं वा। एतेन तदेवानुदितमिति सूचितं। प्रियस्य साक्षात्प्रण
यत्वज्ञापनाय सामान्येन वल्लवयुवतिपदमुक्तं। एवं गीतानंतरं कुंजांतरे तदवस्थावलोकनव्याकुलान्या का
चित्सखी तस्या अतिकठिनविरहवेदनावद्दूतद्दुतिः श्रीकृष्णं ज्ञापयति किं चित्पठितवतीत्याह श्लोकेन। आवा
सोपि नायत इति। आ समंतात् सर्वेषां वासो यत्र भवति स आवास एतत्पीडया व्यग्रा अन्या अपि सख्यः सर्वग
तेद्दूति जायते तादृशोपि विपिनायते त्वां विनान्यत्त्ववदाचरति। ननु न दुःखं पंचभिः सहेति ताभिः सह दुःख
कथने दुःखनिवृत्तिरिति कथमावासस्य विपिनत्वं तत्राह। प्रियासखीमालापीति। या पुनः प्रियसख्यः अंतरंगा
स्तद्भावानुकूलास्तादृशीनां मालापि जालायते बंधनायत इत्यर्थः। यथा जालपतितमीनादयः। जलेपि सति बंधने
न प्राणबाधास्त्वभिवंति। तथा अंतःस्वरूपानुभवदशायां सर्वेंद्रियाणां तत्रैव लये सति ताः पुनर्विविधालापैः प्र
बोधं कुर्वंति तस्मिन् जाले पुनः प्राणबाधा भवंतीति तथोक्तं। एतावता मोहावस्थैव समीचीना न तु जाग्रदवस्थे
ति निरूपितं। अग्रे पुनस्तापोपि त्वद्विरहेण णाग्निना जनितः तादृशः श्वसितेन वायुना कृत्वा दावदहनः ज्वालाक
लापायते। यथा वनानलः प्रादुर्भूतो निलसहायश्चेन्महाकरालो भवति तथा जात इति भावः। एतेन स्याधर्मो
उक्ताः। घर्मिणमाह। सापीति। इंतति खेदे सापि हरिणीरूपायते। यथा वनस्था स्यां हरिणं जालपतिता तत्र

द

पुनः पवनसहायो वनानलः प्रकटस्ता दाहयेव तथा जातेति भावः किंच। अयं बाह्यो मारकः। आंतरमाह
॥३४॥ कंदर्पो वीति। कंदर्पोपि अनंगोपि शार्दूलविक्रीडितं विरचयंश्चित्याश्चर्य अत एव हाकष्टमित्युक्तं। एवं न संभ
वति तादृशामपि भावेच्छेदाश्चर्यमिव तादृशोय मारयते। सा हरिणी काम: शार्दूलश्चेन्मारयत्येवेति तथोक्तं। अ
थवा एवं विधिः कथं करोतीति हा कष्टमित्युक्तं। अथवा। वनस्था हरिणी नायक रहिता। सा पुनः कृतो जालरूपा ए
श्चेद् दावाग्निं अग्रे अधिज्य कोदंडं व्याधं पश्चात् सिंहं पश्यति हा कष्टमित्यनुकरणशब्दः। तथाच। अतिसंता
पेन हा इति कथाकथनं यस्मिन्नेवं यथा तथा दुरवस्थां प्राप्नोति तथेयमपि आवास प्रियरहितां ताप
दावाग्निं भक्षयति ता शीतलोपचारादिकरणतत्परं सखीसमूहं प्राणबाधाकरत्वेन जालमिव पश्यंती
कंदर्पमप्यकस्माद्धाराघातेन शार्दूलमिव तमेव प्राणहरणाद्यमरूपं पुनः व्याधमिवावलोकयंति
इति कर्तव्यता मूढ दुरवस्थां प्राप्तेति निरूपितं। एवं काचन पठितवती। अथवा। इयमेव तदवस्था ज्ञापकं
गीतानंतरं पठितवती ततः स आगत्य पुनरपि तदवस्थां ज्ञापयति गीतेन। देषा खरागेरा धिका विरहे
तव केशवेति। ध्रुवः हे केशव कष्ट इत्यवश्यति। अत्यंत रूपत्वेनानंत भार्यानुत्यादयसि रुद्ररूपत्वेन सर्वेंद्रिया ॥३४॥
णां स्वरूपे लयं करोषि। अमृतरूपत्वेनांतेरनकोटिकंदर्पाधिकलावण्यरूपः प्रकटीभूयानंदं ददासीति तावद्रू
पत्वेन संबोधनं। अयमर्थस्तद्ध्यानलयनेत्यस्मिन्ये स्फुटमेवावगम्यत इति तथोक्तं। तव विरहसाराधिकानु

दारं परमसुखदमपि हारं पुष्पाणां मुक्तानां वा तापदायं त्यर्थं हृदयस्याति कोमलत्वात्तद्धारेण पीडन संभवात्तत्र न धृतः। किंतु अतिकठोरत्वात्पीनत्वाच्च स्तने विनिहितः। तादृशमपि अतिभारं मनुते तत्र हेतुः। कृशतनुरिति। एतेन स्तनस्यापि लावण्यमात्रैकशेषत्वात्तद्धारः सोढुं शक्य इतिभावः। एवं सति न स्पर्शेनैव तयोः पूर्वरूपत्वं भविष्यतीतिभावः सूचितः। किंच हारमात्रमपि भारं मनुत इति तावदेव न किंतु अन्यदपि किंचिद्द्वेषम्यमस्तीत्याह। सरसमसृणमिति। सा पुनः वपुषि तापोपशमार्थं लेपितं मलयजपंकमपि भुजंगोद्गीर्णं विषमेवेदमिति सशंकं यथा स्यात् अतः परं जीवनासंभवात् तथोक्तं तापकरत्वात्तादृशं पश्यति। ननु मलयजे कथं तद्भ्रम इत्यत्राह। सरसं मसृणं च। तदपि सर्पोद्गीर्णं तत्रापि भ्रमो भवतीतिभावः। अग्रे पुनः दशाम्यवस्यासौ निश्वलक्षणमाह। श्वसितेति। सा पुनः श्वसितपवनमपि मदनदहनमिव वहति। तत्र हेतुः। सदाहमिति। दाहकरमित्यर्थः। पुनः कीदृशं। अनुपमपरिणाहं। अनुपम अत्यधिकः परिणाहो विस्तारो यस्य। निःश्वासपवनस्यात्याधिक्यात्तत्रापि सदाहत्वादंतः कामो दीपितं दहनमेव वहतीति स्फुटमेव लक्ष्यत इति भावः। किंच। दिशो दिशीति। सा पुनः कांचित्सर्वतो दिशि दिशि पार्श्वतो वा नयननलिनं किरति प्रक्षिपति। नयनस्य नलिनसाम्येन दीर्घत्वादिधर्माः सूचिताः। तेन सर्वावयवानां कृशत्वात्तदेव दृश्यत इति सूचितं। कीदृशमिव। विगलितनालमिव। विगलितं नालं यस्य तादृ

तथैव भवति। अत्रापि विरहभुजंगेन दृष्टा ७

नुं नलिनमिवेत्यर्थः। नालरहितं तद्यथा इतस्ततः प्रक्षिप्यते तथा प्रक्षिपतीति निरवधानत्वेन प्रक्षेपः न
॥३५॥ तु किमप्युद्दिश्येति व्यज्यते। तादृश्यामवस्थायां तथैव भवतीति भावः। पुनः कथंभूतं। सजलकणजालं।
जलकणजालसहितं। अश्रुधाराप्रवाहसहितमित्यर्थः। नलिनमपि तत्सहितं भवति। किंच। विगलि
तनालत्वकथनेन तद्यथा शीघ्रमेव म्लानं भवति तथेदमपीति व्यंजितं। अवस्थांतरमाह। नयनविषय
मिति। दृग्गोचरमपि किशलयतल्पं विहितः कृतः हुताशस्य विकल्पो यस्मिन् तादृशं कलयति जानाति।
इदं तल्पं न भवति तापकत्वाद्धुताश एवेति ज्ञानं भवति। किसलयानां कोमलत्वात्तापहारकत्वाद्गतिर्या
मयत्वात्तल्परूपत्वेन रचना कृता। तत्पुनः त्वद्विरहेण तापमेवोत्पादयतीति तत्राग्निविकल्पो भवति न
यनविषयत्वे तल्पमेव दाहकत्वेन हुताश एवेति विकल्पपदमुक्तं। अपरामवस्थामाह। त्यजती
ति। दिवसनिर्वाहः कथंचिदपि जातः रात्रिः कथं गमिष्यतीति सायंसंध्यासमये चिंताकुला पाणितले
कपोलं धृत्वा धिष्टति पुनस्तं न त्यजति तथैव चिंतामग्ना तिष्ठतीति भावः। कमिव बालशशिनमिव कपो
लस्यैकभागः करतलाच्छन्नः अपरभागो लक्ष्यत इति बालशशिदृष्टांतः तत्रापि अलोलं चंचलत्वरहितं। ॥३५॥
कपोलमपि तथाभूतं। एतेन करस्य कमलत्वं चंद्रेण विरोधाद्विरोधिनाग्रहितः तत्रापि बालस्तदा चांचल्यर
हितः कृशः पांडुरो भवत्येवेति वदने पि कृशत्वपांडुरादिधर्माः सूसूचिता। किंच। शत्रुना शत्रुर्गृहीतश्चेत्पुनस्तं

न त्यजति तथा चंद्रोपि तापकः परमशत्रुः गृहीत इति तं न त्यजतीति भावः। ततो व्याधिमावस्था दुःसहा
जातेति तां वदइति। हरिरीतीति। हरिरिति हरिरिति सकामं जपति। कामनात् अतः परं वेदनासहिष्णु
त्वेनांतिमावस्थैव भवत्विति। जयकरणकथनेन वक्तुमसक्ता। कथंभूतेव। निकाममत्यंतं विरहेण विहितं
मरणं यस्यास्ताहृशीव। अतः परम विरहान सोढुं शक्तस्य मरणमेव हितं ममेति। अत एव साभिलाशज
पकरणमुक्तं जन्मांतरेपि प्रिया प्राप्तिर्वय थाभवेत्तथेति भावः एवं मूर्छांतावस्थानिरूपितं॥ अतःपर
मुपसंहरति। श्रीजयदेवेति। श्रीजयदेवेन भणितं इति प्रकारकं गीतं सुखयतु। तत्र हेतुं विशेषणेना
ह। केशवपदं उपनिबद्धं। अंतः पूर्वोक्तकेशवपदार्थतां प्राप्तं। एतेन गीतस्य नामात्मकत्वेन भावात्म
कभगवत्स्वरूपत्वमुक्तं। अतः परं मूर्छायामेव यावस्था भवति तां निरूपति श्लोकेन। सारोमांचतीति। ए
वं मूर्छायां प्रियसखीभिः त्वन्नामसु श्राविते पु सारोमांचति रोमांचं प्रकटीकरोति। नामश्रवणे त्वत्स्म
रणे सीत्करोति। अंतः सात्विका विभावास्तथा भवतीति भावः। एतेन मूर्छायां जाग्रदवस्था जातेति सू
चितं। पश्चाद्वहिः संवेदनेत्वदवलोकनाभावाद्विलपति दैन्येन विलापं करोति। ततः पुन मूर्छायामुत्कंपते
अपस्मारावस्थां प्राप्तेव। पुनर्बहिः संवेदने ताम्यति कथंचिदपि न स्वास्थ्यं प्राप्नोतीत्यर्थः। तदा पुनस्त्वामेव
ध्यायति त्वच्चिंतननिष्ठा भवति। ध्यानेन त्वत्साक्षात्कारो बहिरनुसंधानाभावेनैवो द्भ्रमति। उन्मादा

वस्था निरूपिता। उद्भ्रमणे पुनस्त्वदवलोकेन प्रमीलति ध्यानावस्थैव समीचीनेति नेत्रनीमीलनं करो
 ति। तत्राध्यंतः प्राक् यस्यापि कादाचित्कत्वात्तदभावे भ्रमणासमर्थापततिा पतने मूर्छायामंतः पुनस्तद्दर्शन
मुद्याति जम्भे षाद्यर्थमुद्रमनं करोति। पुनस्तदभावे मूर्छति मूर्छामेव प्राप्नोतीत्यर्थः। एवमेव ज्वराद्य
तेनावस्था भवति। आदौ ज्वरारंभे रोमांचः पश्चा उज्जाड्ये सीत्कारः ततस्तन्सोढुमसामर्थ्ये कंपः ततस्ताप
ग्लानिः ततो ध्यानं तंद्रा पुनः कदाचिदुद्भ्रमणं पुनर्नेत्रनिमीलनं भ्रमणासामर्थ्ये पतनं। पुनः कदाचिदुद्भ्रम
णं पश्चात्पुनर्मूर्छति महासंनिपातज्वरलक्षणमुक्तं। एवमनसाध्ये पित्ते वैद्यकसाध्यंजीवनमित्यहं मन्ये इ
त्याह। एतावत्यपीति। मावरतनुः कथमेतामवस्थां प्राप्तेति महद्दुःखसूचितं। तादृशी एतावत्यनुत्वरेस
त्यपि ते रसालदीयाधरामृतरसा किं न जीवेद् पीतु जीवेदिति भावः। असाध्यमपि रसः साध्यं करोति
तितं रसं सं●देहीति सूचितं। ननु रसादि दानं नैवेद्यस्य कार्यं तत्राह। हे खवैद्यप्रतिमत। तत्तुल्य यथान्यदो
षजनितमरणनिवर्तकममृतं तत्पार्श्वे तथैव जनितं तन्निवर्तकममृतं त्वत्पार्श्वेऽस्तीति तद्दत्वा जीवनं सं
पादनीयमित्यर्थः। ननु त्वपि परं तु प्राप्तौ किं साधनं तत्राह। प्रसीदसि यदिति। यदि त्वं प्रसन्नो भवसि। आलदा 
तिदिद्वायरमकारुणिकत्वेन प्रसीदं करोषि चेत्तदा भवेदिति कुंशा एवसाधनं निरूपितं। अन्यथा प्रसि
दसि चेत्तर्हि स्तकः त्यक्त एव। यथा असाध्ये वैद्यास्तं त्यजंति अतः परं न जीविष्यसीति तथा त्वयापि त्य

कइतिभावः।क्वचित्ततोन्यथानीतकइतिपाठः तदात्वत्तोन्यः अंतकोनेतित्वमेवमारकइत्यर्थः।इदानीं
चेदुपचारंनकरिष्यसितदातवपरमकोमलैकस्वभावत्वंयास्यतीत्याह।स्मरातुरामितिहेदेवतवेद्य॥
तत्रापिद्वयतोबाह्योपचारकुशलोत्वंतंतरूपचारेतथेतिज्ञापनायद्वयपदमुक्तं।अतःस्मरातुरांत्वदंग
संगामृतमात्रसाध्यांराधांविमुक्तबाधांचेत्तकुरुषेतदाहेउपेंद्रवज्रादपिदारुणोसिकठिनोसीत्यर्थः।इं
द्रस्यवज्रजमेदारुणंनतुस्वयंत्वंतुउपेंद्रःवज्रःवज्रादपिस्वयमेवतथाभविष्यसीतिभावः।ननुत्वेतावत्य
र्यतंकथंजीवतितत्राह।कंदर्पेति।कंदर्पज्वरजनितःसंज्वरःसंतापस्तेनातुरातनुर्यस्यास्तादृश्याअस्या
इदंपरमाश्चर्यं।तत्किमित्याकांक्षायामाह।अस्याश्चेतश्चित्तचंदनःचंद्रमाःकमलिनीचएतत्त्रयाणांचिं
तासुस्मरणमात्रेपिचरंताम्यति।ग्लानिंप्राप्नोति।तेपदार्थाःतापहारकाअपितस्याअंतिमावस्थासवि
कांतांसंपादयितार्श्चे।तत्रापिस्मरणमात्रेणसंबंधेतुक्षणमात्रेणैवान्यथावस्थाकुर्युः।एतेनतदग्रेता
दृशानांनामापिनग्राह्यमितिव्यंजितं।यद्यप्येवंजीवनस्यासंभावनातथापिजीवनेप्रकारांतता।किं
त्विति।किंतुउत्क्रांतिरसेनअतःपरमार्त्तिःसोढुमशक्येति।प्राणानामुत्क्रांतौबरसः कथमपिशीघ्रं
प्राणोत्क्रांतिर्भवत्विति।तेनरसेनत्वामेवैकंप्रियंध्यायंतिय यथातादृशेसमयेईश्वरध्यानंक्रियते
तथात्वामेवचिंतयंतीयतःशीतलतरंसर्वापेक्षयाशीतलतराभवानेवअतइतरव्यतिरेकेणत्वनाम

मात्रश्रवणेपितांपश्यंतिर्भवतितत्राप्यन्यशीतलपदार्थापेक्षयोत्कृष्टत्वज्ञापनायतरप्प्रत्ययउक्तः।न
॥३७॥ तु साक्षात्संबंधापेक्षया साक्षात्संबंधेतमप्प्रत्ययएवभवेदितिभावः।तत्रापिविरहसिस्थिता।यथाकोकि
लादिकूजनश्रवणंनभवेत् ध्यानेनवाचित्तवैयग्र्यं।एवंप्रकारेणकथमपिक्षणप्राणिति।श्वासमात्रेणज्ञा
यतेजीवतीतियतःक्षीणा।अथवा।जीवनमपिध्यानावस्थापर्यंतमेव।अतःसंबंधेनजीवनंतदभा
वेजीवनाभावएवेतिभावः।अतएवपदमुक्तं।इदमस्मदनुभूतमुक्तं।इदानींभवतोप्यनुभूतमुच्यते।
क्षणमपीति।पुराप्रथमंक्षणमपिविरहोययानसेहनसोढः तस्यज्ञापकमाह।नयनेति।नयनयोर्निमी
लं निमेषः तेनापिखिन्नया खेदंप्राप्ता साअसौ चिरविरहेणकथंश्वसितीतित्वमेववदेतिभावः।तत्रापि
पुष्पिताग्रांरसालशाखांविलोक्य वसंतेतादृशीसेवकामिनंधारयतितत्रापिचिरविरहेकिंकर्त्तव्यं।किं
च।पुष्पितःअग्रःअग्रभागोवदनंयस्याःत्वत्संबंधजनितपरमसंतोषणहास्यवंसीरसालशाखामिवका
चननायिकांविलोक्यस्वयंचिरंविरहात्कथंश्वसितीतित्वमेववद।अन्यच्च।पुष्पिताग्रांपुष्पवतीत्वधर्मयु
क्तांकांचनवीक्ष्यस्यापिकामाविर्भावात्वेदासहिष्णुत्वात्कथंश्वासितीतिभावोपिव्यंजितोभवति।अ ॥३७॥
थवा।त्वत्संबंधेनेवतथाभूतामित्यपिध्वनि।पुष्पिताग्रेतिछंदोनामाप्युक्तं।एवंदशमावस्थापर्यंतंदुःखंदृष्ट्वा
हा कष्टंभगवानेवातःपरंरक्षकइतिकुंजांतरण्यसखीपठति।दृष्टेति।कंसद्विषःकंसोमारकस्तस्यद्विष्टम

रक इत्यर्थः। तेनेनेदानीं विरहः कामश्च मारकस्तन्मारकस्त्वं भवेति भावः सूचितः। एवंभूतस्य भवतो बाहुः श्रेयांसि तनोतु गाढाश्लेषादिनेत्यर्थः। अन्यथा तच्छ्रेयसो भावात्। किंच। तवसर्वदा रक्षाकरणे कस्य भाव इति विशेषणेराहा कीदृशो बाहुः। वृष्ण्याव्याकुलं यद्गोकुलं तस्यावनं रक्षणं। तत्र योरस्तस्माद्धेतोः गोवर्द्धनं उद्धृत्य बिभ्रत। पश्चाद्बल्लवचक्षुभाभिः तसाम यिकोद्भूतपरमप्रेमभरानंदाधिक्येन चिरं चुंबितः। भगवतः सर्वत्रैकरसात्। बाहावपि चुंबितजनितरसानुभवाश्चिरमित्युक्तं। ततस्तत्सानुभवजनित स्वाधीनत्वज्ञानभ्राजनदर्पणि तांबूलादिनावा तद्रूपा सिंदूरमुद्रा तया अंकितः अयं रक्षणोऽस्य एवनान्यभा गयोऽस्य इति। कीदृशस्य। गोपतनोरिति गोपतनुधरस्येत्यर्थः अथवा। गाः पातीति गोपः तद्रूपा तनुर्यस्येति। अतइदानीमपि रक्षणं कर्तव्यमिति ज्ञापितं। किंच रक्षणे प्रकारांतरमपि सूचयति। तथाहि। वृष्ट्याकुलपदेनेदानीमस्रुवृष्टु। तथात्वं सूचितं। तादृश्यारक्षणे योरसो भावी तस्माद्धेतोः गोवर्द्धनं तद्रूपकुचद्वयं बिभ्रत। करेण द्वारणं कुर्वन्नित्यर्थः। एतेन तद्धारणेनैव तद्रक्षणं भविष्यतीति भावः। अग्रेनाभिर्ययाचुंबितस्तथा न यापि करणीयमिति व्यंजितं। ततो बाहुरप्येतदीय एव कर्तव्य इति एतच्च मुद्रैव तस्य कर्तव्य इति भावार्थः सूचितः। एवंकरणे गाढाश्लेषादिनश्रेयो भविष्यतीति प्रियं प्रार्थितवती॥ ॥ इतिश्रीगीतगोविंदटिकायां गूढार्थदीपिकायां स्निग्धमाधवो नाम चतुर्थः सर्गः ॥ ॥४॥ एवंगीतश्रवणे

न माधवोप्यस्यां स्निग्धो जातइति तत्वालं सर्गे निरूपितं । इदानीं श्रीकृष्णापि ससार्द्रचित्तः सखींवदतीह
॥३८॥ हा । अह मिहेति । हे सखि अहं इह निवसामि त्वं याहि । मद्वचनेन राधां अनुनयपूर्वं कृतापराधः क्षंतव्यइति
। ततः इहेवान येथाः इति मधुरिपुणा बिरहक्लेशध्वंसकेन नियुक्ता सखी तत्रेत्य राधां पुनरिदं वक्ष्यमाणं
जगाद ॥ ॥ बराडीरागेणगीयते ॥ ॥ रूपकताले ॥ ॥ सीदतितत्र विरहे बनमालीति । हे सखि तव विरहे
वनमाली- अनेकरमणीरमणात्मककीर्तिमानपि सीदति त्वां विना खेदं प्राप्नोतीत्यर्थः । अथवा । तादृशो
पि तव विरहे वनमाली तापोपशमार्थं विविधकुसुममाल्यधारी जातस्तादृशोपि पुनः सीदति तापमेवभजते
नतु तेन शांतिरितिभावः । ननु कथं न तस्य शांतिस्तत्राह । वहतीति । मदनं उपनिधायसमीपे स्थत्वा उप
धानीकृत्यवा मलयसमीरे वहति सति - मदनस्त्वग्निरूपोभवति । तमुपधानीकृत्य समीरचलनेन सम्प्र
ज्वलितः सन्दहत्येवेति न तदुपचारैस्तापशांतिरितिभावः । किंच । तमेवोपधानीकृत्य विरहिहृदयदल
लनाय कुसुमनिकरे स्फुटति सति । यथा कामः स्वधनुर्बाणमुद्धृत्य विरहृदयदलनं करोति । तथा तद्
र्शनेन प्रियहृदये भवतीति भावः । अतएव सीदतीत्युक्तं । किंचदहतीति । शिशिरमयूखेपि दहति सति । ए ॥३८॥
तेन तत्प्रातिकूल्ये सर्वं विपरीतं जातमित्युक्तं । तदामरणमनुकरोति । अतः परमेतन्निवारकः को
पि नास्तीति दशाम्यवस्थामेवानुकरोति । अनुकरणकथनेन प्राणमात्रं क्वचित्तिष्ठति नान्यकाचनचेष्ट

तिसूचितं। अथवा। शिशिरमयूखे हिमरूपशीतलाग्नौ दहति सति तदनुकरणं करोति। यथा कोपि हि
माग्नौ(दहति सतित) मर्तुं पतति तथेति भावः। एवं कथं करोतीति तत्राहुः। पततीति। मदनविशिखे
पतति सति बहिर्वसंतशोभावलोकेनांतः कामबाणाः पतंति। तदातत्प्रहारजनितव्यथयाति विकलत
रः सन्विलपति· तथ्यथासहिष्णुर्विलापं करोति। अथवा। मदनविशिखे पुष्पे कदाचित्तरोः सकाशाद्भो
परिपतति सति तावन्मात्रोपि साक्षात्कामस्य बाण एव लग्न इति तथाभूताः तथा करोतीति भावः। अ
पिच। ध्वनतीति· मधुपसमूहे ध्वनति सति श्रवणं अपिदधाति तत् ध्वनितस्य रतिसामयिकध्वनिजितसा
म्यात्त्वद्गानमाधुर्यसादृश्याच्च तत्स्मारकत्वेन दुःखदत्वाद्श्रवणमेव वरमिति· तत आच्छादयतीति भा
वः। ध्वनिते अश्रवणमुपायउक्तः अत्रसोपिनास्तीत्याह। मनसीति। वलित आवेष्टितः विरहः अग्निरिव य
स्मिन् तादृशे मनसि सति निशिरात्रौ रुजं उपयाति कामरोगस्य समीपं याति। एतेनातिमावस्था सान्निध्यं
प्राप्नोतीति सूचितं। दिनं तु कथमपि निर्वहति रात्रिरतिक्रूरा भवतीति निशीति पदमुक्तं। किंच। वसती
ति। विपिनस्य विताने विस्तारे अतिघन इत्यर्थः। तत्र वसति। ललितं मनोहरं रतिकेलियोग्यं कुंजगृहा
दिकं त्यजति। स्मारकत्वेन त्वां विनादुःखदत्वात्। विपिनविताने त्वदभावात्। अन्यच्च। धरणिशयने
लुठति स्वास्थ्याभावादितस्ततो लोठनं करोति· एतेनकुसुमशयनादिकं तु दाहकत्वात्त्यजतीति सूचितं।

तत्रापि पुनस्तव नाम बहुवारं वारं विलपति दैन्येन त्वमेव शरणमिति विलापं करोति। एतेनोतिमदशा
नुकरणं द्योतितं। अत्रोंतिमावस्थां निश्चयं च पद्यमेव कविरुपसंहरति। भणतीति। कविजयदेवेक
॥३६॥ विपदेन रसज्ञता ज्ञापिता। विरहिवत् विलसितं यस्य लक्ष्मोलानुवर्णनजनित विरहभावात्मकस्वविलसितेन भ
णति सति। रभसविभवे गुणवर्णनजनितसाक्षाद्भावात्मकरभसस्य विभवोयस्मिन् तादृशे मनसि हरिः सर्वदुःख
हर्त्ताभूत्वा सुकृतेन परमभाग्येन पुण्येन वा उदयतु उदयं प्राप्नोत्विति जयदेवस्यैव प्रार्थना। अथवा। जयदेवकेभ
णति सति। ततः श्रुतेन विरहिणः श्रीकृष्णस्य यद्विलसितं विप्रयोगभावात्मकं तेन कृत्वा राधाया मनसि रभसविभवो
यस्मिन् तादृशे सति सुकृतेन हरिः प्रकटिभवत्विति प्रार्थना। अथवा श्रोतॄणां मनसि विरहिवद्विलसितेन रभसवि
भवे सति साक्षाद्ब्रह्मलक्षणः श्रीकृष्णस्य प्राकृतविरहवच्चेष्टासंभवादनुकरणमात्रमेवेमितियोरभसः संभ्रमस्तस्य
विभवो यत्र तादृशे तस्मिन् सुकृतेन परमपुण्यपुंजेन कृत्वा विरहिविलसितेन सहैव हरिरुदयतु सर्वथा विरहैवायं
नत्वनुकरणमिदमिति रसात्मकत्वात्तादृशमेव ब्रह्मश्रुतिसिद्धमिति स्फुरत्विति भावः। एवं गीतोपसंहारे तादृगव
स्थोचिमोघं प्रार्थयंती कुंजांतरे काचन पठति। पूर्वं यत्रेति। यत्र पूर्वं त्वया समं रतिपतेः सिद्धयः चिरकालाभिलषिताः ॥३६॥
आसादिताः प्राप्ताः पूर्वमित्युक्त्या चिराभिलाषः सूचितः तेन प्रथमं प्रियस्यापि विविधमनोरथभावनेकचित्तवृत्त
ले प्राप्तासि इदानीं तथापि तथैव प्राप्तव्य इति सखी परिहासः सूच्यते॥ किंच॥ स पुनस्तस्मिन्नेवानुभूतैर्वांछितफल

दान्तत्वघर्मे निकुंज मन्मथ महातीर्थे संप्रति वसन् वासं कुर्वन्। माधव इति लक्ष्मीधवत्वेन यद्यपि सकलसिद्धिपू
र्णः असाधारणसर्वोत्कृष्टपत्नीवानपि अनेन करमणीरमणरसिकोपि त्वत्प्राप्त्यर्थं तादृशे तीर्थे वसन् तपः करोती
ति ज्ञापितं। तपसि साधनफलस्वरूपैक्यमाह। ध्यायतस्त्विति। त्वां अनिशं ध्यायति। तपसि तद्देवताया ध्यानं क्रिय
त इति। पुनस्त्वे वालापरूपां मंत्राचलीं जपती। तत्रापि मंत्रजपः प्रोक्त इति जपस्त्वित्युक्तं। साधनमुक्ता फलमाह। भू
यः पुनस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति। अनेन त्वत्कामः त्वदेकदेवतस्त्वामेव ध्यायज्जपन् तिष्ठती
ति कुचयुगं महाफलदानं कबितिभावः। किंच। अत्र कुंभपदव्यंजितमर्थमाह। एवं त्वां ध्यायन् जपन् मन्मथमहा
तीर्थे अगाधरसे निमग्नः लयं प्राप्तः ततः उद्धरणार्थं त्वत्कुचकुंभपरीरंभं वांछति। यथा निमग्नस्योद्धारोपि मद्दिना
दिना। पूर्वरसनिवृत्तौ पुनरुद्बोधो भवति। तथा त्वत्परीरंभे पूर्वरसनिवृत्त्या पुनः उद्बोधो भविष्यतीति बहिःसं
वेदनज्ञापकममृतरूपत्वं तस्योक्तं। एवं तस्यावस्था ज्ञापिता। किंच। यः फलप्राय तीर्थे वसन् त्वदाराधनायां
प्रवृत्तः मध्ये चेत्तस्मिन्नेव तीर्थे मग्नस्तदा फलं दूरापास्तं। ततउद्धारस्त्वत्कर्त्तव्यो भवतीति शीघ्रं त्वत्कुंभं देहि
दूरेति ध्वनितार्थो निरूपितः। एतच्छ्रवणेन पूर्वानुभूतसंकेतस्थलस्मरणसमुत्कंठितां वीक्ष्य पूर्वोक्तैव सखी
पुनस्तां गीतेन समुत्कंठायति॥ ॥गूर्जरीरागेण एकताले। धीरसमीरे यमुनातीर इति। धीरः समीरो यत्रेति
रतः सुखकर उक्तः। तादृशे यमुनातीरे तत्संबंधिवने च जलस्थलविहारार्थमुभयमुक्तं तत्रवनमाली

वसति। पूर्वश्लोके कुचकुंभपरिरंभामृतवांछासहितं ध्यानमुक्तं तत्र ध्याने आकंठमुभयभुजालिंगितां त्वामेव धारि
॥५०॥ तवानिति। अत्र बहिरपि तथा भवत्विति वनमालाधारणेन सूचितं। अथवा· वनमाली विविधरतिकलाकौशलकी
र्तिशालीतिभावः। कथंभूतः। गोपीति। गोपीनां पीनाः पयोधरास्तेषां परिसरः पार्श्वमंडलं तस्य मर्दनं मर्दकं यत्करयु
गं तेन शाली। सर्वदा तदेकशील इतिभावः। एतेन तादृशोपि सांप्रतं त्वदीयतन्मर्दनं वांछतीति शीघ्रं चलेत्यर्थः सूचितः
तदेवाग्रे वदति। रतिसुखसारइति। हे नितंबिनि रतिरमणीयकमनीयसाधनवति गमनविलंबं न कुरु। ननु तदभावे
मम गमनेन किमित्यत्राह। रतिसुखसारे अभिसारं गतं। रतिसुखमेव सारो यत्र रतिसुखार्थं सारः तादृशे तत्रग
तं प्राप्तं· पूर्वं स्थितकुंजसदनात् संकेतितकुंजांतरार्थं प्रस्थितमित्यर्थः। अतस्त्वमपि तं हृदयेशमनुसर। तमि
ति पूर्वानुभूतं चिरकालाभिलषितं च· हृदयेशमिति विरहहृदय एव शेते अंतरेव रसानुभावुकं च। तादृशमपि
वहिरिदानीमभिसारं गतं। अनुलक्षीकृत्य सरेति ज्ञापनार्थं गमनविलंबं न कुर्वित्युक्त्वापि पुनरनुसरेत्युक्तं।
अतएवोक्तं· मदनमनोहरवेषमिति। मदनस्यापि मनोहरो वेषो यस्येति साक्षान्मन्मथमन्मथरूपमितिभावः
एतेनेदानीं तद्दर्शनीयतममिति विलंबं माकुर्वितिभावः। अतः परं तत्र स्थितस्य तन्मार्गावलोकनजनिताव ॥५०॥
स्थां निरूपयति। नामसमेतमिति। मृदुमधुरं यथास्यात्तथा वेणुं वादयंतं। तच्च न केवलं किंतु नामसमेतं तदपि सं
केतितमिति कृतसंकेतमित्युक्तं। कृतः संकेतो यस्मिन्स्थाने। स्थलस्य वा· तादृशवेणुरवश्रवणे शीघ्रमागमिष्य

तीति तथा करोतीति भावः। किंच। तेत्वत्संबंधित्वनुसंगतो यः पवनः तेन चलितं उत्थितं तद्दिशः सकाशाद्दागत
तं रेणुमपि बहुमनुते तनुसंगादपि बहुमानं करोति। एतेन तव मिलने किं किं न भविष्यतीति भावः। किंच। सा
क्षात्तवसंगमस्तु दुर्लभतमः त्वत्पादतलसंबंधि रेणुरपि दुर्लभतरः पवनचलितोपि दुर्लभः यतः तीव्रपवनेन चले
न रेणुरुद्गच्छति। नान्यथेति। तादृशोपि प्राप्तश्चेत् संगादपि बहुमानमुचितमेव तस्य। किंच। पवनः स्वरूपतः
स्वयं सुखदः किं पुनस्त्वत्तनुसंगी रेणुस्तु दुःखदः निरस्यः तादृशस्यापि बहुमानकरणे त्वत्संबंधिस्नेहस्य पराका
ष्ठा सूचिता। अन्यामप्यवस्थामाह। पततीति। पतत्त्र पक्षे पतति सति पक्षिणां कृत्य निरस्ते सति तदा पुनस्त्वत्सं
बंधात्पत्रपर्णे विचलति सति। अथवा उभयोरस्मिन्नपि पृथगेव सति शंकितं भवदुपयानं समीपागमनं यस्मिन्न
र्मणी तल्पं रचयति। मे प्राणप्रिया आगच्छतीति मनोरथशतेन तद्रसनां करोतीति भावः। तत्रापि सचकि
तनयनं यथा स्यात्तथा पथानं वारंवारं पश्यति। क्षणं दृष्टिं शयनरचनायां क्षणं पंथावलोकने यद्यप्यवलोक
ने वीप्सा द्योतक पदं नोक्तं। तथापि शय्यारचनायां मार्गस्येवावलोकने तद्रचना संभवइति क्षणं शय्यारचनायां
दृष्टिः क्षणं तदवलोक इति वीप्सावगम्यत इति वारंवारं पश्यतीति व्यंजितार्थो व्याख्यातः। किंच। कदाचिदागता
मया न ज्ञाता चेत्पुनः क्रोधेन परागच्छेच्च मयाप्यग्रे गत्वा पुरस्कारः कृतो भवेदिति सचकितमीक्षणमुक्तं। पतत्त्र
शब्दः पक्षिवाच्यपि पतत्त्रं पक्षे पक्षिणोः इति धरणिः। तदा पतत्त्र पक्षिणि पतति सतीत्यर्थः एवं भवदागमनोत्कलिकाकु
लितहृदयं प्रति विलंबो न कार्य इत्याह। मुखरमिति। हे सखि कुंजं प्रति चल। ननु गमने कदाचित्केनापि ज्ञानं भवेत्तत्र

ह। मंजीरं त्यजयतो मुखरं अधीरं च। क्षणमपि धैर्येण मूकीभूय स्थातुमशक्तं। गमनमात्रेण प्रलपतीति हे
।।४१।। त्कव्यमिति भावः। रिपुमिवः रिपुर्यथा मर्म कथयति। तथेदमपीति सर्वथा त्याग उक्तः। पुनः कीदृशं केलिमुले
लमिति। केलौ मुलतरं लोलं चंचलं तेन तदभ्यासात्तदेकस्वभावत्वेन सर्वदा मुखरः परं त्विदानीं गमनतथा हेन
रिपुरेवेति त्यक्तव्यं केलिसमय एव चरणकमले प्रियेणैव स्थापयनीयं भविष्यतीति भाव्यर्थो व्यंजितः। अथ
वा केव्यर्थ एव खलु लोलं उत्सुकमित्यर्थः अत एव मुखरं पुनः पुनः गमनार्थं प्रेरयति। अधीरं त्वद्गमनविलं
बामहिष्णु एवं सति सहने धैर्याभावः केलिकरण एव लोकशालस्येति गमनार्थमेव प्रेरयतीति भावः। अस्मिन्
क्षेत्यागासंभवात् खस्य तादृकस्वभावत्वेन स्वत्यागमपि वारं वारं वदतीति मुखरत्वं तस्योक्तं। ननु मामपि
त्यक्त्वा शीघ्रं गच्छेति निरूपितं तन्निवारयति। सतिमिरपुंजमिति। कीदृशं कुंजं तिमिरपुंजसहितं। स्वस्वरू
पकांतिजनितं निवारयति। शीलयेति। एवं गमनं बोधयित्वाऽग्रिमशोभामाह। उरसीति। मुरारेति। रसप्रति
बंधकनाशकत्वेन विरहनिदाघतापनिवर्तकत्वं सूचितं। तादृशात् एव घनद्रवशोभमाने आलिंगनादौ
रसवृष्टात्तथाभूते अथवा श्यामत्वेन तथारूपे पुनः कीदृश उपहितः हारो मुक्ताहारो येन यत्र वा। कीदृशे ।।४१।।
तरलाबलाका यत्र एवं घनसादृशेन रति सामयिक शोभा निरूपिता। रतिसमये उरसस्तरलत्वात् मुक्ताहार
स्यापि तथात्वेन बलाका नामपि तरलत्वमुक्तं। तादृशे उरसि। हे पीतेगौरांगि त्वं तडिदिव राजसि राजयिष्य

भि। वर्तमानसामीप्येवर्तमानप्रयोगः ननु तडिच्चंचलेतिकथंतत्साम्यंतत्राह। हरतिविपरीते। स्वाभाविक
सुरतेतडितः स्थिरता घनस्यैवचांचल्यंतत्पूर्वार्द्धे निरूपितं। विपरीतेघनस्यैस्थैर्यंतडितश्चांचल्यंइ
तिरतिविपरीतइत्युक्तं। यद्यपि उपहितहारे मुरारेरुरसिलं राजसि तत्रदृष्टांतः तरलबलाके घनेतडि
दिवेतियोजनास्पष्टातथापि इवद्वयानुपपत्त्याघनंइवशोभमानइतिव्याख्यातं। बलाकानांतरलबक
थनेन मुक्ताहारस्यापितरलतासूचिता। तत्तरलतयानायकरतिर्व्यंजितः पूर्वार्द्धे। तदाघनस्यचंचलत्वंतडि
तः स्थैर्यं चित्रं। उत्तरार्धेरतिविपरीत इतिसंबोधनेनस्फुटमेवतडिश्चांचल्यघनस्यस्थैर्यंनिरूपितं। एवंशो
भावेभवप्राप्तौ साधनंसुकृतविपाकइति। हे सुकृतस्य विपाकः परिणामः परिपक्वफलरूपः तद्रूप। अथ
वा सुकृतस्य विपाकोयस्याः एतावत्पर्यंतंतत्पाकोनजातइतिविरहजदुःखानुभवोभूदतः परंतत्परिपाक
दशायामीहग्रूपपरमानंदानुभवंप्राप्स्यतीतिभावः। किंच। सुकृतफलंतच्चातिरूपंतदत्र विपरीतत
त्वेनेनोक्तमितिभाव्यर्थः सूचितः। तत्रापि राजसीतिकथनेनतडिद्दृष्टांतव्यंजितचांचल्येनच विवि
धकलाकौशलं तज्जनितशोभातिशयोद्दीपितः। इदानीं नायकरतौकलाकौशलं शिक्षयति। विगलि
तवसनमिति। किसलयशयनेत्वंशयितासतीः प्रापितेत्यध्याहार्यं। पंकजनयनेश्रीकृष्णोहर्षस्य
निधानं निधिमिव निजंजघनं घट संघटितं कुरु उभयपार्श्वताद्दढबंधं रचयेत्यर्थः। अकस्मा

न्निधिरिव प्राप्येत तदा हर्षनिधानं संभवत्येवेति तथा दृष्टांतः कीदृशं जघनं विगलितं वसनं
॥४२॥ यस्मात्। स्वयमेवेत्यर्थः तत्करस्य शोत्तथैव रसावेशाच्च नीवी प्रति प्रणिहिते च करे च तत्स्मरा
मीत्युक्तमपि तथैव अत एव ताहृन्। समयेरतिसमयेरति समर शौर्येण संमुखत्वयात्वयैव घट
नं तेन सह कार्यं न तु लवकालरतोचितेति त्वं जघनं घटयेत्युक्तं अन्यथा नायककर्तृकं तद्भवत्ये
वेति तथा न वदेदिति भावः। पुनः कीदृशं परिद्रुतारशना पि यस्मात्। वसनं स्वत एव विगलितं रश
नातेन दूरिक्षता। अंतरायत्वात्। अत एवापिधानमावरणरहितं। अन्येपि कश्चन वसनभूषणाद्य
पहारेण कमप्यावरणरहितं करोति तदा सदंभ्यो भवतीति प्रियेण जघनस्य कृतमिति। तस्य जघनेन
हृदबंध करणमुचितमेवेति तथोक्तमिति भावः। एवमुत्कंठामुत्पाद्य पुनर्गमनार्थं प्रार्थयति। हरिर
भिमानीति। हरिः दुःखहर्ता इदानीं तवेत्यर्थः। पुनरभिमानी। ममापराधेन सा कुपिता सती गतेति स्वस्मि
न्सापराधाभिमानवान्। अतस्तत्क्षमां कृत्वा कृपयेत्यर्थः। अथवा हरिः सर्वासां दुःखहर्ता अत एव ता
सां अभिमानः। अभिमतो मानः सन्मानस्तद्वान्। अथवा अभिमानी मया प्रणिपाते कृतेपि समानं ॥४२॥
त्यजतीति कदाचित्पुनर्मानवान् भवेदित्याशयेन तथोक्तं। एतेन गमने विलंबं न कर्तव्यमिति ज्ञापितं।
ननु गम्यते किमेतावत्त्वरयसीति चेत्तत्राह। रजनीरिति। इदानीं रजनिरपि विराममुपयातीत्युक्तमिति

अंगुलीनिर्देशनः कीदृशी क्रीडोपयोगिनी रंजनकारिणी सकलगुणाधारा सा पुनः क्षणमात्रेण विरामं
यातीति त्वराकरणं त्वदेवाह। अतः सत्वररचनं त्वरासहिता रचना यस्मिन् रचना अभिसाररचना तत्
दृशं मम वचनं कुरु शीघ्रं चलेत्यर्थः। तत्र गत्वा पुनर्मधुरिपुकामं पूरय। जितकामस्यापि कामं पूरयतत्स्फूर्ति
स्त्वयैव कार्येति प्रार्थ्यते। एवमुपयुक्तार्थं संपूर्णगीतमुपसंहरति। श्रीजयदेवेति। श्रीजयदेवे एवं परम
रमणीयं यथा भवति तथा भणति सति अथवा परमरमणीयं तच्चरितं भणति सति तत्र साधनं। कृतहरि
सेवतिगृहदासानां तु तत्र यो रसः सुलभ इति तत्कपयालद्दास्य प्राप्यात स्यापि सुलभत्वं जातमिति भावः
अतः हे श्रोतारः तन्मदीयं भणितं श्रुत्वा तद्भावैकनिष्ठाः प्रमुदितं हृदयं यथा स्यात्तथा हरिं नमत। ताहृ
शाभावेन हृदय एवानंदानुभवात्तदानंदजनितपरमदैन्याविभावेन नमनं सूचितं। ननु नमनमात्रेण किं
भवति तत्राह। सदयमिति। नमनमात्रेणैव दयां करिष्यतीति भावः। कीदृशं हरिं। सुकृतकमनीयमिति
यो नैकसुकृतैः कमनीयः वांछनीयः तथापि न प्राप्यते स नमनमात्रेण दैन्यं दृष्ट्वा दयां करोतीति पर
मदयालुत्वं निरूपितं। एतदनंतरं तत्संकेतस्थं तदवस्थापन्नं प्रियं दृष्ट्वा इति न कारा चित्सखी तत्र
आगता प्रियायास्थां वदति। सैव वा पूर्वानुक्तं तत्येषयति। किं किरतीति। हे कांते तस्य परमप्रियमनोह
रा। अन्यथा अन्यावज्ञपि ह्यः सेति किमर्थं मे तावान्खेदः स्यात्। किंच। सोपि तव प्रियः यथा त्वं तस्य प्रि

त
यातथा तथापि सन्तिष्ठेति। तथाच स इदानीं मदनकदनेन दुःखेन व्यथया वा। क्रांतः ग्लानिं प्राप्तो वर्त्त
॥४३॥ त इति गमने विलंबं करोतीति भावः। क्रांतत्वमेवाह। मुहुर्वारंवारं श्वासान्विकिरत्कामाभिलाषवशे
येन प्रक्षिपति। अथवा मदपराधेन गता पुनरागमिष्यति वा न वेति। पुनः पुरः अग्रे आशाः दिशः ईक्षते त
दपि मुहुः एकदिग्दर्शने तत्र न दृष्टा चेतन्यां पश्यति। तत्राप्यदर्शनेऽपरं पश्यति तत्राप्यदर्शने पुन
स्तामेव पश्यत्येवं मुहुः मुहुर्वीक्षिणं। तथैव मुहुः कुंजं प्रविशति अनेन प्रथमं कुंजद्वारे एव त्वन्मार्गम
वलोकयंस्तिष्ठतीति सूचितं। द्वारांतरेण किं कुंजसदनमेव प्रविष्टेति कुंजप्रवेशः तत्रानलोकने पुन
र्बहिरागच्छत्येवं मुहुः कुंजप्रवेशः कीदृशं कुंजं गुंजत् भ्रमरैरित्यर्थः यद्यपि विविधकुसुमसौरभ
लोभेन ते गुंजंति तथापि सा कोटिपद्मिनीसकाशादतिशयशोभेति प्रायस्तद्योरभा घ्राणेनैव ते गुं
जंतीति त्वदागमनशंकया मुहुर्मुहुः प्रवेशोप्युक्तः। एवं कुंजे बहिरप्यदर्शने बहु यथा स्यात्तथा मुहुस्ता
म्यति संतापक्लेशं प्राप्नोति। गुंजारवश्रुते आगमनशंकया किंचिदाश्वास्थ्यं तत्रादर्शनेऽस्वास्थ्यमिति मुहुः
पदं। कदाचित्त्वद्विधिं वधादि मनोरथेन शय्यां रचयति। तदपि मुहुः क्षणं बहिरागमनं क्षणमंतः
प्रवेश इति पर्याकुलं यथा स्यात्तथा मुहुर्मुहुरीक्षते। एवमन्यस्मिन्नपि कार्ये क्रियमाणं सर्वत्र दृ ॥४३॥
द्विरीक्षणमेव प्रतिष्ठितमिति पुनर्मुहुरीक्षत इत्युक्तं। अन्यथा पौनरुक्त्यं स्यात्। पर्याकुलमिति शय्यार

चनेवीक्षणेच योज्यं। एवं तव प्रियस्यावस्था वर्त्तत इति यथोचितं कुर्विति भावः। गमने त्वराहेतु
भूतमन्यमपि प्रातिकूल्याभावं निरूपयति त्वद्वाम्येनेति। हे मुग्ध असावभिसारक्षणो रम्यः परमरमणी
यः अथ वा रम्य-क्रीडायोग्यः अस्मिन् क्षणे गमने कृते निःप्रत्यूहं प्रियेण सह रमणं भवेदिति ज्ञापना
य रमणज्ञापकरम्यपदमुक्तं। अतो गमनविलंबनं विफलं यावानेव विलंबस्तावानेव फलानुभवाभाव
इति भावः। किंच। मुग्धः सुंदरमूढयोरित्युक्त्या मुग्धपदस्योभयवाचकत्वाद्यदि सत्वं बहुसितदासौंदर्यमु
क्तं त्वं नोचेन्मूढत्वमिति ज्ञापितं अभिसारक्षणस्य रम्यत्वमेवाह। तद्वाम्येनेति। एतदवधि तव विधिरपि प्रतिकूलः
स्थितः यत एवंरूपं कुंडं प्राप्तासि अतः परं सोप्यनुकूलो जात इति त्वद्वाम्येन समं संहेवति ग्मांशुरघुना स्तंगतः
समग्रं यथास्यात्तथेति कथनाद्वाम्यमपि त्वत्संबंधि विविधि प्रातिकूल्यमपि समस्तं गतं। अथवा अभिसारे अयमे
व तिग्मांशुर्वा मस्तस्मिन्नस्तमिति समग्रम् तिमिं तत्वद्वाम्यमेव तथा जातमिति भावः। अथवा एतदवधि त्वयि वाम
तावक्रता स्थिता प्रियेदोषशंकया ईर्ष्या विज्ञाच्च सा सांप्रतं दूरे गतेति तिग्मांशुना सहोपमा। किंच। गोविंदस्य मनो
रथेन च। कदाचिदपि साभिलिष्यति। मिलतिचेमेव मेवं करिष्यत इति विविधमनोरथेन समं तमोपि सांद्रतां प्रा
प्तं। यथा तन्मनोरथाः प्रतिक्षणं वर्द्धते। तथा तमोपि प्रतिक्षणं घनीभवतिति भावः। किंच। कोकानां करुणस्व
नेन सदृशी मदभ्यर्थनापि दीर्घा भवति यथा तेषां करुणस्वनः रात्रौ वियोगेन प्रतिक्षणं दीर्घ भवति तथाम

द्भ्यर्थनापि बद्धेते मयापि प्रियावस्थां ज्ञात्वा करुणं मुहुः प्रार्थ्यत इति भावः ॥५॥ किंच । स्वाभ्यर्थनायाः कोकक
॥४४॥ रुणस्वनेन सादृश्य कथनात्तत्त्वन स्यापि मदभ्यर्थनासाम्यं सूचितं तेनैतेषां स्ववियोगतः करुणस्वनो यद्यपि तथा
पि त्वदवस्थां दृष्ट्वा स्वदुःखविस्मरणे त्वत्संगमासमयं च वीक्ष्य करुणस्वनेनैते पि त्वत्प्रार्थनामेव कुर्वतीति ज्ञापितं
यद्वियोगेनास्माकमीदृशी दशा प्रादुर्भूता त्वमिदानीं संयोगसमय इति कथं विलंबः क्रियत इति । किंच । एता
दृशे अभिसारेऽन्योपि विलक्षणो रसः कादाचित्को भवतीति कौतुकार्थं तथोत्कंठाव र्धनायतं रसं वर्णयति आ
श्लेषादिति । कदाचित्तमग्निं अन्यार्थं इतरकार्यार्थं गतयोः परस्परं अज्ञातमेव स्वस्वप्रयोजनार्थं चलितयोः ।
अकस्मान्मार्गे मिलितयोः मिलनानंतरं भ्रमो भवति । अयं क इयं केति । भ्रमं प्राप्य पुनः प्रश्ने कृते संभाषणे जा
नतोः परस्परं स्वरूपज्ञानवतोर्दंपत्योः व्रीडाविमिश्रो रसः कः कः प्रादुर्भूतो न भवति अपितु विविधप्रकारक
भावोऽस्मीदनेन विविधभावमिश्रो विलक्षणोनेकविध एव भवतीति भावः । मां विहायान्यनायिकासमीपे
गच्छत्ययमिति ज्ञानेन तस्याः सकाशान्नायकस्य व्रीडा नायकस्यापि चित्ते एतादृशी मतिर्माभवतु यदीदृशे समये इयं कुत्र प्रतियातीति नायकसकाशात्तस्या अपि व्रीडेति परस्परं तथा रसो भवतीत्युक्तं । यद्यप्युभयोरप्य ॥४४॥
नुभूततत्तत्स्वभावयोः सर्वदा सरससौहार्दशीलयोः कदाचिदप्युदितान्यथाभावयोस्तादृशयोः परस्परं
विपरीतशंकानुदयएव ग्रामीणानामेव तथा संभवान्नतूत्तमोत्तमयोः तथापि स्वस्व मनसि स्वस्व विषयिकान्य

थासंभावनया व्रीडा। ननु कथमन्यथाभावो न जात इति ज्ञायेत तत्राह। आश्लेषादिति। परस्परं ज्ञानानं
तरमाश्लेषः कृतः न तु पूर्वं। सोपि यथापूर्वमेव कृतः न तु तत्र किमपि वैलक्षण्यं जातं। तदनंतरं चुं
बनमपि तथैव जातं। तदनंतरं नखोल्लेखादिकमपि पूर्वसदृशमेव कृतं। ततः स्वांतजः मनोजः तस्य
प्रोद्बोधः तत्तीस्थानस्थितस्य तत्तदंगस्योन्मर्दनादिनोद्बुद्धोभवति तस्मादपि न विलक्षणता ज्ञाता। त
दनु संभ्रमादादरादपि यथापूर्वं रत्यादरादपि। तदनु रतारंभाच्च प्रीतयोः। यथा पूर्वमेव तदानंदनिभृतैका
त्मनोः एवंकरणेन परस्परमन्यथाशंका न जातेति ज्ञायेत अन्यथा यथापूर्वं रसो न भवेदिति। किंच। एवं
प्रकारेण प्रीतयोरित्युक्त्या पूर्वमपि निरुपाधिकी प्रीतिरुभयोरिति व्यंजितं। अतः तादृशस्वभावेनैव ता
दृशविश्वासादन्यथाभावसंभावनापि न जातेति भावः। स्वमनसि स्वस्वविषयिकशंकामात्रं तु रसाभा
सभावाभासैकरसः पोष्यत इति रसः पुष्ट एवाभूत्तु वैरस्यमिति सर्वमनवद्यं। एवं तत्रापि गाढ
तिमिरे कदाचिदेवमेव मिलनं भवति चेत्तदा तथा स सरसोप्यनुभूतो भवेदित्येवं निरूपिकाणां हृदयं। एवं
श्लाभिसारोद्यतां पुनरप्युत्कंठयति। सभयचकितमिति। तिमिरे अंधकारे सभयचकितं यथास्या
त्तथा दृशौ विन्यस्यंती विमलकटाक्षकिरणप्रसारेण तिमिरं ज्योत्स्नेव भविष्यतीति सभयचकितमुक्तं
पुनः तरुं तरुं प्रति मुहुः स्थित्वा मुहुः पदानि चितन्वंती-पदे पदे भ्रमेण विरहजकृशालेन चगंतु भवान्कात

धापदानिदधातिभावः एवंकथमपिरहःएकांतेकुंजगृहे प्राप्तंत्वांपश्यन् सः कृतार्थतांउपैतु हेसुमुखि शो
॥४५॥ भनं मुखंयस्यास्तादृशीतिसंबोधनं त्वन्मुखदर्शनेनैव कृतार्थतामुपैष्यतीतिभावः। किंच। अनंगतरंगि
भिरंगैः सह। अनंगतरंगयुक्तैरंगैः सहेत्युक्त्यातत्तदंगानां त्वद्रूपविषयग्रहणेनकृतार्थतानान्यथेतिसूचि
तं। एवंकृतार्थतायांसाधनं सुभगइति। शोभनोभगोभाग्यंयस्येति। तादृशभाग्येनत्वन्मुखदर्शनंभविष्य
तीतिभावः। एवमाकर्णयंतीसा ललिताभिसृत्यान्यकुंजांतरे स्थिता। ततः काचिदन्यसखी प्रियाकांक्षांसूचयंती।
प्रकाशतोन्यार्थबोधयंतीगूढाभिसंधिनाभ्रमरसप्रस्थावनां कुर्वतीकुंजांतरेणपठितवतीत्याह। राधेति
राधायामुग्धंयन्मुखारविंदंतस्यमधुपः यथामधुपस्तन्मधुपानकर्त्ता तथायमेतन्मुखस्येतिभावः। भाविकर्तृ
त्वंसूचयतिपुनः कीदृशः त्रैलोक्यमौलिरूपायास्थलीवृंदावनभूमिः तस्यानेपथ्योचितं नीलरत्नं। अवनिभा
रस्यावतारउत्तारणेअंतकः उपसंहरकः। स्वछंदं यथास्यात्तथाव्रजसुंदरीजनमनस्तोषार्थप्रदोषरूपः सकलः
सर्वदाप्रियसंमेलनतः सर्वासांतोषप्रदइतितथोक्तः। पुनः कीदृशंकंसध्वंसेनधूमकेतुः एतेन दुष्टप्रापकोनिष्ट
निवारकश्चोक्तः। तादृशोदेवकीनंदनः त्वांअवतुरक्षतु। अथवा गूढाभिसंधिमुद्घाटयति। राधेति। राधाया ॥४५॥
मुग्धमुखारविंदस्य मधुपः। ध्यानेतदेकलुब्धतान्यकुमंत्रशक्तइतिज्ञापितं। पुनः त्रैलोक्यं पादतलेपाताल
कटितटीभूतलंउदरंआकाशः स्वर्गः तस्यत्रितयस्य मौलिरूपरिभागः हृद्देशस्तस्यस्थली वक्षोजमंडलं त

स्थेनपथ्योचितं नीलरत्नं नीलमणिरित्यर्थः। क्षणं तथैव ध्यानं। पुनः कीदृशं। अवनीरूपा कटितटीत
त्रभाररूपा कांचीतस्या उत्तारणे अंतकः तदेतरायासहिष्णुत्वेन तदुत्तारक इतिभावः। किंच। स्वच्छंदव्रज
सुंदरीणां जनाः सखीजनाः अस्मत्सदृश्यः तेषां मनस्तोषप्रदोषरूपः ससमयो यथास्माकं प्रियसंगमसु
खानुभावकत्वेन तोषदाता तथा त्वत्संगमरसावलोकनजनितपरमसंतोषदातेत्यर्थः। इयमस्माकं मनो
रथभावना। पुनः कीदृशः कंसो मारकत्वेन विरहएव तस्य ध्वंसेन धूमकेतुः यथा तदुदये दुष्टभूपादिनाश
स्तथा श्रीकृष्णचंद्रोदये विरहांधकारनाशः एतैर्विशेषणैरनिष्टनिवृत्तिरुक्ता। परमानंदरूपेष्टप्राप्तिमा
ह। देवकीनंदन इति। अदित्यवतारदृपा देवकीति पुराणांतरे प्रसिद्धिः सा। पुनः अदितिर्द्यौरिति श्रुतेर्द्युरू
पा तस्या नंदन इति रतिसमये गगनचारित्वेनानंददातेति भावः। एवं श्रीकृष्णस्यांतर्मनोरथात्मकभावना
निरूपिता। तादृशः पुनरधुना बहिर्मिलितः सन् तथैव कुर्वन् त्वामवलितिस्वस्वामिनीमुत्कंठयतिस्मेति
भावः। इति श्रीगीतगोविंदटीकायां गूढार्थदीपिकायां साकांक्षपुंडरीकाक्षोनाम पंचमः सर्गः॥ ५॥ ॥छ॥
अतः परमभिसारानंतरं विरहकालरतया अग्रे गंतुमसमर्था मतएव मध्ये मार्गे कुत्रचित्कुंजे स्थितां अथ
वा राधा मुग्धमुखारविंदे लुक्तार्थश्रवणेन तथाभूतां दृष्ट्वा कांचित्सखी श्रीकृष्णं प्रत्यागत्य वदति। अथे
ति। अभिसारेण तावद्रागमनानंतरं गंतुमशक्तां अग्रगमनासमर्थां लतागृहे स्थितां तां दृष्ट्वा गोविंदे तत्स

॥४६॥ मेपि आगत्य तच्चरितं प्राहेति संबंधः। कीदृशीं चिरमनुरक्तां। गंतुमशक्तां चिरमनुरक्तामिति विशेषण
द्वयेन तस्याः कष्टावस्था निरूपिता। प्रियस्याप्यवस्थामाह। मनसिजेन मंदे दीने अधीर इत्यर्थः। इतिकर्त
व्यतामूढे वा। तं देवगुणकरीरागेण गायति रूपकताले। नाथ हरे सीदति राधा वासगृहे इति। हे नाथ। नाथः
स एव यः स्वकीयान् रक्षति। तादृशे त्वयि सत्यपि राधा वासगृहे। सीदति अत्यंतमस्वास्थ्यमनुभवति। य
द्यपि तद्वासगृहे तत्र बद्धोऽस्मत्सदृशः तथाप्यस्माभिस्तद्रक्षा न भवति किंतु त्वयैवेति सा कर्त्तव्येति भावः
रक्षाहेतुभूतं संबोधनमाह। हे हर इति। दुःखहर्त्तः अतः परं रक्षाभावे हरित्वमेव यास्यतीति सूचितं। तदव
स्थां वर्णयति। पश्यतीति। रहसि एकांते। दिशि दिशि सर्वतः भवंतमेव पश्यति तच्चर्णान्मान्यत् विषयत्वे
न गृह्णातीत्यर्थः। ननु स्वात्मानं स्वचक्षुः पश्यतीति कथमितर विषयं न गृह्णातीत्युच्यते तत्राह। त्वदधरम
धुरेति। त्वदीयो योधरस्तत्संबंधि निमधुरं मधूनि पिबंतं स्वं पश्यति न त्वभिन्नत्वेन भावनायां सर्वत्र
भवंतं पश्यंती स्वात्मानमपि तद्रसपानासक्तं पश्यति नान्यदा स्वानुसंधानाभावात्। अन्यामप्यव
स्थामाह। त्वदभिसरणरभसेनेति। भावनायामेव कदाचित्त्वाभिसरणे तस्या अपि गमनरभसो जा ॥४६॥
यते तेन चलंती गमनोद्यता भवति पश्चात् कियंत्यपि पदानि चलंती पतति विरहकातरतया गंतुमस
मर्था सतीत्यर्थः। पुनस्तत्तापशांत्युपायं रचयति। विहितेति। विहितानि विशदानां विसकिस

लयानांवलयानियमाताद्दृश्यपिसातवरतिकलयापरंजीवतीनतुमृणालादिरचनोपायेन·सारचनाप
रमस्माभिरूपचारत्वेन क्रियते नतेनतापशांतिः अतः भावनायांतवरतिचेशायांपरंजीवतिनोचेज्जीव
नमेवनभवेदितिभावः। अन्यामपिचेष्टांनिरूपयति। मुहुरिति। कदाचित् भवद्रूपंकृत्वाताद्दृश्यान्येवमं
डनानिकृत्वा। तल्लीलांचानुकृत्य मुहुर्वारंवारं मवलोकिताः मंडनानिलीलाचययाताद्दृशी·यथाप्रियस्य
तानिसाचभवतितथैव मायाकृताःसंतिवानवेतितद्वलोकनं। तत्रपुनः मधुरिपुरहमितिभावनशीलास
तीतथैवाभिनयंकरोतीतिभावः। मधुरिपुपदेनकालस्यापिनाशकोयमितितथाभावनायांजीवनंस्था
स्यतीतितथाकरणंसूचितं। क्षणांतरेस्वानुसंधानात्सखीमनुवदति। त्वरितमिति। हेसखि प्रतिक्षणंत्व
दसिहरिरागतइति इदानीमपि त्वरितंकथमभिसारंनोपैती तिसखींप्रत्यनुवारंवदति। त्वरितंकथंनो
पैतीत्युक्त्याहरिरायतीतिसखीपूर्वोक्तिःसूचिता। एतावत्युत्कंठाज्ञापिता। अग्रिमचेष्टांवदति। श्लिष्यती
ति। कदाचित् अनल्पं अतिगाढं अंधकारं हरिरेवोपगतइतिभ्रमेणश्लिष्यतिचुंबतिच। तिमिरेहरिभ्र
मस्यहेतुमाह। जलधरकल्पमिति। श्यामत्वेनतिमिरेतथाभ्रममात्रेणतत्करणेतदनुभवाभावात्ह
रिर्नागतइतिदुःखेन विह्वलाविलपतीत्याह। भवतीति। भवति त्वपि विलंबिनिसति आगमनविलंब
युक्तेसति विगलितलज्जासती विलपतिरोदिति। तत्रहेतुः वासकसज्जेति। अद्यप्रियएष्यतीति

तस्मिन्वासेरत्युपयोगिसामग्र्यादिना आत्मानं सज्जीकरोति युद्धार्थं धनुःकवचादिसपन्नं करोतिस
॥५७॥ वासकसज्जा प्रियानागमने सर्वस्य विफलत्वात्तद्दुःखेनाधैर्याद्विलपति रोदितीति तथोक्तं। वासकसज्जा
त्वं निरूप्य गीतमुपसंहरति। श्रीजयदेवकवेरिति। इदमुदितं रसिकजनं श्रोतारं मुदितं तनुतां। एवंभावेन प्र
भुर्मिलतीति ज्ञाने तादृशाचरणेन तदानंदयुक्तो भवतीति भावः। एवं पुनर्मोहिनं तव ध्यान एव प्रतिष्ठितां भ
वतीत्याह। विपुलपुलकपालिरिति। हे कितव धूर्त आयामीत्युक्त्वापि नागतः वचनैरेव वंचयसीति तथा
संबोधनं। पूर्वोक्तफलायानंतरं पुनः स्थातुमनाः तथा तव आमोदाय कंदर्पः अत्युग्रः तस्य चिंतास्मरणं विध
यति सामयिकोयं स्मृत्वा तद्ध्यानेन लग्नासती साभंगा क्षीरसजलनिधिमग्नाति छलि प्रथमं रसे पश्चाद
गाधे तस्मिन् घोमग्रा भवतीति भावः। तामेवावस्थां निरूपयति विशेषणेन भावनायां आदौ तव स्पर्शे वि
पुलपुलकपालिः विपुलापुलकानां पालिर्यस्मिन् कर्मणि: पश्चान्नखदानादिना स्फीतः सीत्कारो यस्मिन्
लतोग्रेनी वीस्पर्शे जितं जडिमा यथा स्यात् लतोग्रे काकुना दैन्येन नेनन्त्यादि दीनवचनेन व्याकुलं यथा
स्यात् तथा व्याहरंती वचनान्युच्चारयंती। एवंभावनया ग्रे रतिविलासं भवतीति भावः। क्षणांतरे पुनः ॥५७॥
बहिः संवेदनायां भवदागमनप्रत्याशया तदुचितां चेष्टां करोतीति तां वदति। अंगेष्विति। तदागमनप्र
त्याशया सकलांगेषु विविधाभरणानि करोति भूषयतीत्यर्थः पुनः पत्रे पर्णेपि संचारिणि वायुनाचलि

ते सतीं त्वां प्राप्तं परिरंभं कर्तुं तदा पुनः शय्यां वितनुते विविधकुसुमादिना चरयतीत्यर्थः ततः चिरं ध्या
यति। शय्यारचनायां विविधवंधादिस्मरणे तद्ध्यानमग्नैव चिरं तिष्ठतीति भावः। अथवा त्वद्विलंबेक
थं नायातः किं वा अन्यत्र गत इति संकल्पविकल्पादिना त्वामेव ध्यायतीत्यर्थः इत्येवं प्रकारेणाकल्पः
पूर्ववासकसज्जात्वेन शृंगारादिरचना ततः पत्रसंचारेऽपि त्वदागमनविकल्पः पश्चात्तल्परचना ततः त
त्र संकल्पलीलास्वोल्लासा वा तत्तत्र प्रत्येकं व्यासक्ता प्रियाषावरं तनुस्त्वया विना न निशां नेष्यति। यद्येव
तावत्पर्यंतं त्वदागमनेच्छा यामनोरथासक्ता निशानिर्वाहमकरोत् इदानीं अधिरसिंचेत्तदा आशापा
शान्निशानिर्वाहः कर्तुमशक्य इति दशम्यवस्थां प्राप्स्यतीति सूचितं। एतस्मिन्नंतरे काचित् कुंजां
तरे पठितवतीत्याह। किं विश्राम्यसीति। पूर्वं कदाचित् संकेतीकृते भांडीरतरुतटे श्रीकृष्णात्प्रथमं
राधा तत्रागता तत्र केचन पथिकं विश्रांतमवलोक्य तं प्रति व्याजेनाक्कवती तदाह। अ[illegible]ग अत्र भा
डीरभूमीरुहि भांडीरनामकवटवृक्षतल इत्यर्थः त्वं किं विश्राम्यसि अत्र विश्रामं मा कुर्विति भावः।
ननु कथं निषिध्यते तत्राह। कृष्णभोगीभवन इति। कृष्णाकालायो भोगी सर्पस्तस्य भवनं गृहरूपमिति
तादृशः सवसतीति न स्थेयमत्र। तर्हि इदानीं कुत्र गंतव्यं तत्राह। हे भ्रातः चिंता न कर्तव्या इतः सा
नंदनंदास्पदं यासि नेति व्याहृतिः किंतु तत्र याहि। ननु कदाचिद्दूरं तद्भविष्यति तत्राह। इतोदृश्यो

चरमिति। एतेनसमीपएववर्त्ततत्रगतस्यतवभक्ष्यादिकमपिप्राप्तंभविष्यतीतिसमृद्धिमत्त्वद्योत
॥४८॥ कसानंदपदेनसूचितं। एतावद्राधावचनमाकर्ण्यनंदांतिकमागत्यसवदतीतितद्वचनंराधायाःअध्व
गमुखान्श्रुत्वापुनर्नंदांतिकेगोपतःगोपयतइत्यर्थः। अथवागोपतःगोपनार्थेसार्वविभक्तिकस्तसि
ल्। अतिथिप्राशास्तिगर्भाः सायंकालेअतिथिरयमागतइतितत्प्राशस्त्यंतत्स्तुतिःतत्सत्कारादिक
रणरूपंचगर्भेयासांतादृश्योगोविंदस्यगिरोजयंति। एतेनराधास्त्वसंकेतितस्थलेगतेतिज्ञानात्त्वया
पितत्रगंतव्यमितिकृष्णाभाभिप्रायवनइत्युक्तिप्रकाशितस्वसंकेतगोपनार्थंतत्सत्कारादिस्तुतिरूपागि
रःप्रोक्ताः। एवंसतिसंकेतेराधाप्राप्तेतिप्रियेणापितत्रगंतव्यमितिप्रस्तावनाकृता॥ इतिश्रीगीतगोविंद
टीकायांगूढार्थदीपिकायांधन्यकुंठोनामषष्टःसर्गः॥६॥ राधाभिसारश्रवणेनात्मानंवैकुंठादपिधन्यंम बे
न्यतइतिसर्वेत्तिथोक्तं। क्वचित्सोत्कंठवैकुंठइतिपाठः। तदास्फुटएवार्थः। अभिसारार्थंगदांधकारःपूर्वव
र्णितः। इदानींचंद्रोदयेवर्ण्यते। अत्रांतरइति। एतस्मिन्नंतरेराधायाःसंकेतगमनानंतरंयावच्छ्रीकृष्ण
स्तत्रगच्छतितावदिदुरंमुजालैर्वृंदावनांतरंअदीपयत्प्रकाशितवान्। कथंभूतःदिक्सुंदरीवद ॥४८॥
नस्यचंदनबिंदुःभालदेशस्थतिलकरूपः। एतेनसौभाग्याधाररूपभालस्थानस्थायिबिंदुस्वरूपत्वनि
रूपणेनतादृशसौभाग्यवत्त्वंचंद्रोदयकृतंदिशांनिरूपितं। अतःपरंश्रीराधायाअपिश्रीकृष्णचंद्रे

दयेन तथा सौभाग्यं भविष्यतीत्यप्यनेन (तथा सौभाग्यं) सूचितं। पुनः कथंभूतः स्फुटलांछनश्रीः स्फु
टं यल्लांछनं तेन लब्धा श्रीर्यस्य। एतेन श्रीकृष्णोपि अन्यसंबंधजनितलांछनानि चिन्हान्यपि संति त
थापि श्रीरूपत्वेन शोभामेव कुर्वंतीति सूचितं। लांछनहेतुगर्भं विशेषणमाह। कुलटेति। कुलटापदेन र
स विशेषानुभाविका ऽभिसारिका ज्ञेया। अन्यथा कुलटानां प्रत्यक्षतोपि संकेतगमने प्रतिबंधासंभवा
त्तद्धर्मे अभिसारमार्गस्तस्य पातः घातकरणं चंद्रोदये ऽभिसारासंभवात्तन्मार्गपातो विक्रियत इति सं
जातं पातकं यस्य यो मार्गघातं करोति तस्य तत्पातकेन लांछनमपि लग्नं भवति। अभिसारेण संकेतस्थ
लागतायाः वासकसज्जायाः प्रियानागतश्चेत्तन्मार्गघातो विकृत इत्यपि लांछनहेतुः सूचितः। एवमत्रा
न्यनायिकासंगमचिन्हसहित आगतः प्रियो गूढाभिसंधिना निरूप्यते। तथाहि। दिक्सुंदरीवदनचंद
नबिंदुरिति इतरनायिकावदने यच्चंदनभालतिलकीभूतं तस्य बिंदुर्यस्मिन् चुंबनादौ लग्न इति भावः। ता
दृश इंदुः कृष्णचंद्र एव अंशुजैः स्तस्तच्छिन्नकिरणसमूहरांतरं कोपेनादीपेनादीपयदुद्भासित
वान्। कीदृशः। कुटलेति। अन्यत्रगमनेन वासकसज्जाया मार्गपाते स्फुटं च लांछनश्रीर्यस्येति। चंद
नबिंदुव्याजेन सैव पातीति भावः। भद्रं तथागतो माधव मंततरेण त्यत्र वक्ष्यमाण तथा भानोभिप्रा
येण प्रकरणादौ नया सूचितं। एवं चंद्रोदये पुनः परितप्ता जातेत्याह। प्रसरतीति। शशधरबिंबप्र

सरति उच्चैरुल्लसतिच पुनः माधवे हित विलंबे सति। माधवपदेनान्यत्र रमणं विलंबहेतुरुक्तः। अ
॥४८॥ तएव विधुरा विह्वलासा प्रियागमनं प्रतीक्षमाणा विरचिता विविध विलापं यथास्यात्तथा उच्चैरत्यंत
परितापं चकार। तदेव गीतेन वदति। मालव रागे प्रतिमठ ताले। यामिहक मिह शरणं सखी जन वचनवं
चितेति। ध्रुवपदं। हविध संप्रति इह विपनेकं शरणं यामि त्वंप्रति कूलश्चेदन्यः को पिरक्षको नास्तीति भा
वः। तन्वेलाच दैन्य कोहेतुस्तत्राह। सखीजन वचन वंचितेति। अहंतु विदितत्वा सनायास्यतीति। तथापि
सखि जन वचनैर्वंचिता। सर्वा विहाय प्रियस्त्वन्मार्गमवलोकयन् त्वद्ध्यानपरः संकेते तिष्ठतीत्यादिव
चनैर्वंचिताह मत्रागतासतुनागतइत्यतः परं कामो मारयतीति कं शरणं यामीति दैन्यमेोच्यते। किं
च। कथित समयेपीति अस्मिन् समये हरिः वनं संकेतितं न ययो नागतवान् अहहेति खेदेन तदाम
मेदं अमलरूपं योवनं विफल जात मित्यर्थः अथवा भयमपि तथा जातिभावः किंच। यदनुगमना
येति। असौ स तत्र गत इति सखीजन वचनेन मयापि तदनुगमनं कृतमिति यमुनपश्चात् गमनार्थं गह
नं निबिडमपि वनमेनत् शीलिनमवगाहितं। सपुनर्नागत इति तेन नागमनेन मम हृदयम समशरेण
कामेन कीलितं। कामेन मे हृदयं तथा विद्धं यथा वाणवेधानंतरमंतः स्थितेन टङ्काल्येन व्यव्यथा भवति ॥४८॥
तथेदानीं व्यथा प्राप्नोतीति भावः। अत एव कीलितपदं अंतः कालस्थिति ज्ञापकमुक्तं। अतः परं जीवनमशा
मिलि ५

क्यमित्याह। ममेति। इदानीं मम मरणमेव वरं व्यथाया असहिष्णुत्वात्। मरणे तु तद्ध्यानेन तस्मिन्ने
व संगताभवामीति वरमुक्तं। तत्र हेतुः। अतिवितथकेतनेति। अत्यंतं वितथं मिथ्याभूतं केतनं संकेत
मंत्रणं यस्याः तादृशी जातेति। कथंचित्संकेते संघटितेपि स नागत इति पुनस्तत्संघटनं दुर्लभमेवेति त
द्वेवोचितमिति भावः। केतनं लांछनं कार्ये गेहे चापि निमंत्रण इति विश्वः। ननु दुःखमेव सोढव्यं तत्र
विचारणीयं तत्राह। किमिहेति। इह वने विरहानलं किं विसहामि किमर्थं विसहामित्यर्थः। मरणं विह
य दुःखसहने अचेतन त्वमेव हेतुरिति अचेतनेत्युक्तं। चेतनत्वे तु विवेकात्सर्वेंद्रियाणां तदेकनिष्ठत्वे
न संयुक्तत्वान्मरणेपि संयुक्तैव तिष्ठामीति दुःखाभावात्तत्सहनमेव नास्तीति भावः। किंच। मया दृष्ट
मप्येतन्न शक्यत इत्याह। मामहहेति। इह मधुरापि मधुयामिनी वसंतयामिनी मां विधुरयति विकल
यति। तत्र हेतुः। कापि मदितरा कृतं सुकृतं यया तादृशी कामिनी हरिमनुभवतीति। मम तादृशसुकृ
ताभावात् दुःखानुभव इति परितापहेतुरुक्तः। किंच। अइहेति। खेदेन वदति। यद्घुनैव कलयादि म
णिभूषणं तत्तदंगपुभूषणत्वेन रचितं तदिदानीमेव दूषणप्राकं कलयामि जानामि। तत्र हेतुः। हरिवि
रहनवहनेनेति। तेन विना सर्वतापकारकमभूदिति भावः। किंच। कुसुमसुकुमारतनुमिति। अत्र कुसुमं
वासंतीकुसुममेव ज्ञेयं। पूर्वं वासंतीकुसुमसुकुमारैरित्युक्तत्वात्। तद्वत्सुकुमारा कोमला तनुर्य

स्यास्तादृशीं मां स्रगपिकुसुममाला सुखदायिनीत्वेनभूषणत्वेनप्रियाश्लेषमिवमन्यमानहृदि
॥५० धृता। सैवाधुना प्रियं विना अतनुशररूपाजातेति यालीलया प्रहारं करोति अत एवाति विषमशी
लयेयुक्तं। याभूषणरूपासैव शररूपेति विषमं शीलं यस्याइत्युक्तं। तत्राप्यहं तन्वीकुसुमसुकुमार
तनुरिति पूर्वमेवमुक्तं। तादृशीं मां हंतीतिकथं जीवनमितिभावः। किंच। जीवनासंभवेऽन्यमपिहे
तुमाह। अहमिहेति। इहवनेऽहं निवसामि। अहमित्येकाकिनी। किंच। नगणितं वनं वेतसं यया-ता
दृशीतन्मिलनसंतोषेण किमपि मनसिनधृतं। सपुनः मां चेत सापिनस्मरति। सच मधुसूदनः कालध्वं
सकः। तादृशश्चेन्नस्मरति जीवनाभावः। सिद्धएवेतिभावः। किंच। सकिमपिकरोतु। ममसावशर
णं जीवयतु मारयतु वेतु मुदैव स्थिता। तदा गीतमुपसंहरति। हरिचरणशरणेति। हरिचरणमेवश
रणं यस्यतादृशस्य जयदेवकवेः भारती। अथवा राधाया हरिचरणमेवशरणं यस्यां तादृशीजयदेव
कविभारती। हृदिवसतु। कीदृशी कोमलाः याः कलाश्चेष्टराधाभावभेदनिरूपकाः तद्वती। तादृशीनांहृ
दयवासेन सर्वदा तद्भावः स्फुरतीति भावः। तत्र दृष्टांतः। युवतिरिव। सापि कोमलकलावतीहृदय
स्थिता परमानंदरूपभावानुत्पादयतीति तदृष्टांतयुक्तः। युवति दृष्टांतेपि कोमलकलावतीति विशे ॥५०॥
षणेन भारत्या अपि तद्भावात्मकत्वं सूचितं। अतःपरं प्रियानागमनमध्यसंभावितमितिद्वितंस्तर्क